A.C. Joshi Library
P.U. Chandigarh

MSS No. 370 A Subject Religion

Name of MSS श्रीमद् भागवत ; भावार्थ दीपिका सहित

Author

Period Folios 91

Script Devnagri Source Prithipal Singh

Missing Folios

श्रीमद् भागवत; भावार्थ दीपिका सहित ॥
मिन्न पडे ॥ ल० अ० १२ पं० मू० प०

Canto I

भा॰ प्र॰
टी॰
१

कमल

ॐ श्रीगणेशाय नमः ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामचं
द्राय ॐ वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे १ विश्वसर्गवि
सर्गादिनवलक्षणलक्षितं श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत् २ माधवोमाधवावीशौ सर्व
सिद्धिविधायिनौ वंदे परस्परात्मानौ परस्परनुतिप्रियौ ३ संप्रदायानुरोधेन पौर्वापर्यानुसारतः श्री
भागवतभावार्थदीपिकेयं प्रतन्यते ४ क्वाहं मंदमतिः क्वेदं मंथनं क्षीरवारिधेः किं तत्र परमाणुर्वै यत्र म
ज्जति मंदरः ५ मूकं करोति वाचालं पंगुं लंघयते गिरिं यत्कृपा तमहं वंदे परमानंदमाधवं ६ श्रीमा

ॐ जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यंति यत्सूरयः
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि १

द्भागवते नाम सर्गादिदशलक्षणं महापुराणमल्पं च पंचलक्षणमिष्यते १ तदुक्तं द्वादशस्कंधे दश
भिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः केचित्पंचविधं ब्रह्मन्महदल्पव्यवस्थयेति श्रीमद्भागवताभिधः सु
रतरुस्तारांकुरः सज्जनिः स्कंधैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः द्वात्रिंशत्त्रिशतं च यस्य विल
सच्छाखाः सहस्राण्यलं पर्णान्यष्टदशेष्टदोतिसुलभो वर्वर्ति सर्वोपरि १ अथ नानापुराणशास्त्रप्रबंधै
श्चित्तप्रसत्तिमलभमानः तत्र तत्रापरितुष्यन्नारदोपदेशतः श्रीमद्भगवद्गुणवर्णनप्रधानं श्रीमद्भागवत
शास्त्रं प्रारिप्सुः श्रीवेदव्यासस्तत्प्रतिपाद्यदेवतानुस्मरणलक्षणं मंगलमाचरति जन्मेति प॰ परमेश्वरं धी

अन्वयः साधनं व्याप्यं साध्यं व्यापकमित्युच्यते साध्याभावो व्याप्याभावः व्यापकः साधनाभाव यत्सत्वे यत्सत्वं तदन्वयः यदभावे यदभावः तद्व्यतिरेकः   कादाचित्कत्वे सति स्वरूपबोधकत्वं तटस्थलक्षणत्वम्
यत्र यत्र घटकुंडलत्वं तत्र तत्र मृत्सुवर्णत्वं यत्र यत्र मृत्सुवर्णत्वं न तत्र तत्र घटकुंडलत्वं न   यद्यत्कार्यं भवति तत्तत्सकर्तृकं भवति यत्र कार्यत्वाभावः तत्र सकर्तृकत्वाभावः

तत्स्वरूपलक्षणं तटस्थलक्षणं सत्यमिति सत्यत्वे हेतुः यत्र यस्मिन् त्रयाणां मायागुणानां तमोरजः
सत्वानां सर्गो भूतेंद्रियदेवतारूपः अमृषा सत्यः यत्सत्यतया मिथ्यासर्गोपि सत्यवत्प्रतीयते तं परं सत्यमित्य
र्थः अत्र दृष्टान्तः तेजोवारिमृदां यथा विनिमय इति यथा अन्योन्यस्मिन्नन्यावभासः स यथाधिष्ठानसत्तया स
द्वत्प्रतीयत इत्यर्थः तत्र तेजसि वारिबुद्धिः मरीचितोये प्रसिद्धा मृदि काचादौ वारिबुद्धिः वारिणि च का
चादिबुद्धिरित्यादि यथायथमूह्यं यद्वा तस्यैव परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमु
क्तं यत्र मृषैवायं त्रिसर्गो न वस्तुतः सन्निति यत्रेत्यः तेन प्रतीतमुपाधिसंबंधं वारयति स्वेनैव धाम्ना म
हसा निरस्तं कुहकं कपटं यस्मिंस्तं तटस्थलक्षणमाह जन्मादीति अस्य विश्वस्य जन्मस्थितिभंगा य
तो भवंति तं धीमहीति तत्र हेतुः अन्वयादितरतश्चार्थेषु कार्येषु परमेश्वरस्य सद्रूपेणान्वयात् अकार्ये
भ्यः खपुष्पादिभ्यश्च तद्व्यतिरेकात् यद्वा अन्वयशब्देनानुवृत्तिः इतरशब्देन व्यावृत्तिः अनुवृत्तत्वात्सद्रू
पं ब्रह्म कारणं मृत्सुवर्णादिवत् व्यावृत्तत्वात् विश्वं कार्यं घटकुंडलादिवदित्यर्थः यद्वा सावयवत्वादन्व
यव्यतिरेकाभ्यां यदस्य जन्मादि तद्यतो भवतीति संबंधः तथा च श्रुतिः यतो वा इमानि भूतानि जायंते
येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीत्याद्याः स्मृतिश्च यतः सर्वाणि भूतानि भवंत्यादियुगागमे य
स्मिंश्च प्रलयं यांति पुनरेव युगक्षये इत्याद्याः तर्हि किं प्रधानं जगत्कारणत्वात् ध्येयमभिप्रेतं नेत्याह अभि
ज्ञ इति स ईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृजतेति श्रुतेः ईक्षतेर्नाशब्दमिति न्यायाच्च तर्हि जीवः

ईक्षतेर्नाशब्दं
सत्वादित्यर्थः

अशब्दं वेदैः शब्द्याप्रतिपाद्यं
प्रधानं ध्येयं नेत्यर्थः

भा॰ स्व॰
टी॰
१
2

स्वाराडित्याह स्वराट्स्वेनैवराजतेति स्वतःसिद्धज्ञानमित्यर्थः तर्हिकिंब्रह्मा हिरण्यगर्भःसमवर्त्ततताग्रेभूतस्य
जातःपतिरेकआसीदितिश्रुतेः नेत्याह तेनेइत्यादिकवयेब्रह्मणोपिब्रह्मवेदंयस्तेनेप्रकाशितवान् योब्र
ह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै तंहदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्येइति
श्रुतेः ननुब्रह्मणो अन्यतोवेदाध्ययनमप्रसिद्धंसत्यंतत्तुहृदामनसैवतेनेअनेनबुद्धिवृत्तिप्रवर्त्तकत्वेनगा
यत्र्यर्थोदर्शितः वक्ष्यतिहि प्रचोदितायेनपुरासरस्वतीवितन्वताजस्यसतींस्मृतिंहृदि स्वलक्षणाप्रादु
रभूत्किलास्यतः समेऋषीणामृषभःप्रसीदतां ननुचब्रह्मास्वयमेवसम्यक्प्रतिबुद्धोऽन्यायेन वेदमुपल
भतांनेत्याह यद्यस्मिन्ब्रह्मणिसूरयोपिमुह्यन्तीति तस्माद्ब्रह्मणोपिपराधीनज्ञानत्वात् स्वतःसिद्ध
ज्ञानपरमेश्वरएवजगत्कारणं अतएवसत्यः अन्यतःसत्ताप्रदत्वाच्चपरमार्थसत्यः सर्वंतत्त्वेनचनिर
स्तकुहकः तंधीमहीतिगायत्र्याप्रारंभेणगायत्र्याख्यंब्रह्मविद्यारूपमेतत्पुराणमितिदर्शितं यथोक्तं
मत्स्यपुराणेपुराणदानप्रस्तावे यत्राधिकृत्यगायत्रींवर्ण्यतेधर्मविस्तरः वृत्रासुरवधोपेतंतद्भागवत
मिष्यते लिखित्वातच्चयोदद्याद्धेमसिंहसमन्वितं प्रौष्ठपद्यांपूर्णमास्यांसयातिवैष्णवंपदं अष्टादशस
हस्राणिपुराणेतत्प्रकीर्त्तितं पुराणांतरेच ग्रंथोष्टादशसाहस्रोद्वादशस्कंधसंमितः हयग्रीवब्रह्मविद्या
यत्रवृत्रवधस्तथा गायत्र्याचसमारंभः तद्वैभागवतंविदुः पद्मपुराणे अंबरीषंप्रतिगौतमवचनं अंब
रीषशुकप्रोक्तंनित्यंभागवतंशृणु पठस्वस्वमुखेनापियदीच्छसिभवक्षयमिति अतएवभागवतंनाम

आत्मस्वरूपा वेदरूपा इत्यर्थः

= १ =

2A

इदानीं श्रोतृप्रवर्तनाय श्रीभागवतस्य कांडत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति धर्म इति श्रीकृ
ष्णः शरणं समस्तजगतां कृष्णं विना का गतिः कृष्णेन प्रतिहन्यते कलिमलं कृष्णाय तस्मै नमः कृष्णात्त्रस्य
ति कालभीमभुजगः कृष्णस्य सर्वं वशे कृष्णे भक्तिरखंडिता भवतु मे कृष्ण त्वमेवाश्रयः अत्र श्रीमति
सुंदरे श्रीभागवते परमो धर्मो निरूप्यते परमत्वे हेतुः प्रकर्षेणोज्झितं कैतवं फलाभिसंधिलक्षणं क
पटं यस्मिन्सः प्रशब्देन मोक्षाभिसंधिरपि निरस्तः केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इति अधि
कारितोऽपि धर्मस्य परमत्वमाह निर्मत्सराणां परोत्कर्षासहनं मत्सरः तद्रहितानां सतां भूतानुकंपिनां

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वे
द्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ॥

एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तं ज्ञानकांडविषयेभ्योऽपि श्रैष्ठ्यमाह वेद्यमिति वास्तवं प
रमार्थभूतं वस्तु वेद्यं न तु वैशेषिकादीनामिव द्रव्यगुणादिरूपं यद्वा वास्तवशब्देन वस्तुनोंऽशो जीवः
वस्तुनः शक्तिर्माया च वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथगिति वेद्यं अयत्नेनैव ज्ञातुं श
क्यते ततः किमतस्त्वाह शिवदं परमसुखदं किंचाध्यात्मिकादितापत्रयोन्मूलनं च अनेन ज्ञानका
ण्डविषयेभ्यः श्रैष्ठ्यं दर्शितं कर्मणोऽपि ॥ ॥०

भा॰प्र॰ श्रेष्ठमाह महामुनिः श्रीनारायणः तेन प्रथमं संक्षेपतः कृते देवताकाण्डगते श्रेष्ठमाह परैः शास्त्रैस्त

टी॰ दुक्तैः साधनैर्वा ईश्वरो हृदि किं सद्य एवावरुध्यते स्थिरीक्रियते वा शङ्कः कदाचित् किन्तु विलम्बेन कथंचि।

१ देवात्र शुश्रूषुभिः श्रोतुमिच्छुभिरेव तत्क्षणादेवावरुध्यते इदमेव तर्हि किमिति सर्वैर्न श्रूयते तत्राह।

3

श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः स
द्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्

२

२ कृतिभिरिति श्रवणेच्छा तु पुण्यैर्विना नोत्पद्यते इत्यर्थः तस्मात्काण्डत्रयार्थस्यापि यथावत्
प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठम् अतो नित्यमेतदेव श्रोतव्यमिति भावः २ श्रीरामकृष्णा।
भ्यां नमः श्रीगोविंदायनमः ॥ ०

२

3A

इदानीं न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयते अपि तु सर्वशास्त्रफलरूपमिदं अतः परा
मादरेण सेव्यमित्याह निगमेति निगमो वेदः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वात् तस्य फलमिदं भा
गवतं नाम तच्च वैकुंठगतं नारदेनानीय मह्यं दत्तं मया च शुकस्य मुखे निहितं तच्च तन्मुखाद्भुवि विग
लितं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया शनैरखंडमेवावतीर्णं न तूच्चनिपातेन स्फुटितमित्यर्थः १ प
तत्र भविष्यदपि भूतवन्निर्दिष्टमनागताख्यानेनैवास्य शास्त्रस्य प्रवृत्तिरत एवामृतद्रवेण संहितं।
लोके हि शुकमुखस्पृष्टं फलममृतमिव स्वादु भवतीति प्रसिद्धं अत्र शुको मुनिः अमृतं परमानन्दः स एव द्र

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं पिबत भागवतं रसमालयं मुहुरहो रसि

वो रसः रसस्तेनायं लब्धातिरेकी भवतीति स्फुटेः अतः हे रसिकाः रसज्ञाः तत्रा कास्तु विभावुकाः २
पि भावुकाः हे रसविशेषभावनाचतुराः अहो भुवि गलितमिति सुलभत्वोक्तिः इदं भागवतं नाम फ
लं मुहुः पिबत ननु त्वगस्थ्यादिकं विहाय फलरसः पीयते कथं फलमेव पानं तत्राह रसं रसरूपमतः
त्वगस्थ्यादेर्हेयांशस्याभावात् फलमेव कृत्स्नं पिबत अत्र च रसतादात्म्यविवक्षया रसवत्त्वस्याविवक्षितत्वात्
अगुणाद्यैव चेतोऽपि रसयातेमतयः प्राप्यभावान्नैतो वितैव रसफलमिति सामानाधिकरण्येन न त्वधिकरणे रस
भागवतयोर्भेदः एकरूपत्वात् न च फलमित्युक्ते पानासंभवो हेयांशप्रसक्तिश्च भवेदिति तन्निवृत्त्यर्थं रस
मित्युक्तं रसमित्युक्ते पिपासितस्यारसस्य पानमपाकृत्यात्फलमित्युक्तमिति द्रष्टव्यं न च भागवतामृतपाने सो

परमो धर्मः तापत्रयोन्मूलनं संबंधः निबंधप्रतिपादकभावः तत्संबंधाधिकारी तापत्रयोन्मूलनकामो ऽधिकारी

भा०प्र० टी० ४ ५

तदेवमनेन श्लोकत्रयेण विशिष्टदेवतानुस्मरणपूर्वकं प्रारिप्सितस्य शास्त्रस्य विषयप्रयोजनादिविशेषो
नस्तवमेवमेतेन च श्रोतृनभिमुखीकृत्य शास्त्रमारभते नैमिष इति श्रीब्रह्मणा विसृष्टस्य चक्रस्य नेमिः
शीर्यते कुण्ठीभवति यत्र तन्नैमिषं नैमिषमेव नैमिषं तथा च वायवीये एतन्मनोमयं चक्रं मया सृ-
ष्टं विसृज्यते यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयं प्रणि-
पत्य महादेवं विससर्ज पितामहः तेपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुं प्रययुस्तस्य चक्रस्य यत्र
नेमिर्विशीर्यत तद्वनं तेन विख्यातं नैमिषं मुनिपूजितमिति नैमिषे इति पाठे वा [illegible] ३

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः सत्रं स्वर्गाय लोकाय सहस्रसममासत ४

क्षेत्रे तथा हि गौरमुखमृषिं प्रति श्रीभगवद्वाक्यं एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा उवाच
निमिषेणेदं निहतं दानवं बलं अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितं भविष्यति यथार्थं वै
ब्राह्मणानां विशेषकमिति अनिमिषः श्रीविष्णुः तस्य [illegible] तस्य क्षेत्रे तथाविधे शौनकादि-
[illegible] स्वर्गाय लोकायेति स्वर्गीयो हरिः स एव लोकः भक्तानां निवासस्था-
नं तस्मै तत्प्राप्तय इत्यर्थः सहस्रसमाः संवत्सरा अनुष्ठानकालो यस्य तत्सत्रं [illegible] आ-
सत उपविविशुः यद्वा आसत कुर्वन्नित्यर्थः आलभन्ते निर्वपति उपयन्ती त्यादिवल्लयोश्चारणमा-

श्र

४

प्रातःकाले हुता एव हुता अग्नयो यैस्ते त्वनेन नित्यनैमित्तिकहोमसाकल्यं दर्शितं इदं वक्ष्यमाणमादरात्पप्रच्छुः
५ विविदिषतां नृणां यच्छ्रेयस्तत्सर्वेषां स्वज्ञानातिशयमाहुः त्वयेति त्रिभिः श्लोकैः ६ इतिहासो महाभार
तादिः तत्सहितानि न केवलमधीतानि अपि तु आख्यातान्यपि व्याख्यातानि च उत अपि यानि धर्मशा
स्त्राणि तानि अपि किं च यानीत्यादि विदां विदुषां मध्ये श्रेष्ठः व्यासः परावरेति वेदपरावरे सगुणनिर्गुणे ब्रह्म

त एकदा तु मुनयः प्रातर्हुतहुताग्नयः सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ५ ऋषय ऊचुः त्व
या खलु पुराणानि सेतिहासानि चानघ आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ६ यानि
वेदविदां श्रेष्ठो भगवान्बादरायणः अन्ये च मुनयः सूत परावरविदो विदुः ७ वेत्थ त्वं सौम्य तत्सर्वं
तत्त्वतस्तदनुग्रहात् ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ८ तत्र तत्राञ्जसायुष्मन्भवता य
द्विनिश्चितं पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हसि ९ प्रायेणाल्पायुषः सभ्य कलावस्मिन्युगे ज-

णि विदन्तीति वेत्थ वेत्सि जानासि सौम्य हे साधो तेषामनु -नाः मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः -
ग्रहात् त्वत्तो ज्ञाने हेतुमाह ब्रूयुरिति स्निग्धस्य प्रेमवतः उत एव रहस्यमपि ब्रूयुरेव ८ अंजसा ग्रंथार्जवे
न एकान्ततः श्रेयः यद्यपि चात्यन्तिकं श्रेयःसाधनं ९ अन्येन बहुना कालेन बहुशास्त्रश्रवणादिभिर्विनिश्चयस्य
ख्याते तत्त्वेनाहुः प्रायेणेति सभ्य साधो अस्मिन्युगे कलौ अल्पायुषो जनास्तत्रापि मंदा अलसास्तत्रापि
सुमंदमतयः तत्रापि मंदभाग्या विघ्नाकुलास्तत्रापि उपद्रुता रोगादिभिः १० ॥

नचबहुशास्त्रश्रवणंविनावैनैवफलसिद्धिरित्याहुः भूरीणिकर्माणिग्रन्थरूपाणियेषुतानिसमुद्धृत्ययथावउ
द्धृत्ययेनोद्धृतवचनेनात्माबुद्धिः संप्रसीदतिसम्यग्प्रसन्नाभवति ११ प्रश्नान्तरंसूतजानासीतिपञ्चभिः
भद्रंतेइत्यौत्सुक्येनाशीर्वादः भगवान्निरतिशयैश्वर्यादिगुणः सात्वतांमत्स्यदेवनसत्त्वमूर्तिर्भगवानुस
रूपास्तयाविद्यतएषामितिसात्वताभक्ताः स्वार्थेऽणन्तत्समवायसारिवत् तस्यवाअश्वणसांख्य
तेदेवसात्वतइतिभवति तेषांपतिःपालकः यस्यार्थविशेषस्यचिकीर्षयावसुदेवस्यभार्यायांदेव।

भूरीणिभूरिकर्माणिश्रोतव्यानिविभागशः अतःसाधोत्रयत्सारंसमुद्धृत्यमनीषया ब्रूहिनः
श्रद्दधानानांयेनात्मासंप्रसीदति सूतजानासिभद्रंतेभगवान्सात्वतांपतिः देवक्यांवसुदेव
स्यजातोयस्यचिकीर्षया १२ तन्नःशुश्रूषमाणानामर्हस्यंगानुवर्णितुं यस्यावतारोभूतानां
क्षेमायचभवायच १३ आपन्नःसंसृतिंघोरांयन्नामविवशोगृणन् ततःसद्योविमुच्येतय
द्बिभेतिस्वयंभयं १४ यत्पादसंश्रयाःसूतमुनयःप्रशमायनाः

क्यांजातः १२ अंगहेसूत तत्त्वोवर्णयितुमर्हसि सामान्यतस्तावद्यस्यावतारोभूतानांक्षेमायपाल
नायभवायसमृद्धये १३ तत्प्रभावमनुवर्णयन्तः तद्यशःश्रवणोत्सुकमाविष्कुर्वंति आपन्नइति
त्रिभिः संसृतिमापन्नःप्राप्तः विवशोपिततः संसृतेः यच्चहेतुः यद्यतोनाम्नः भयमपिस्वयंबि
भेति १४ किंच यस्यपादःसंश्रयोयेषामतएवप्रशामो प्रयनंवर्त्मआश्रयोवायेषांतेमुनयः

5A

उपसृष्टाः स्वविषयीमात्रेणासेविताः सद्यः पुनंति स्वर्धुनी गंगा तस्या आपः तस्या दर्शनस्तनाः न तु तेष्वेव तिष्ठं
ति गतस्तत्संवंधेन पुनंत्योपि अनुसेवया पुनंति न तु सद्य इति मुनीनामुत्कर्षोक्तिः १५ पुण्यश्लोकैरी
ड्यानि स्तव्यानि कर्माणि यस्य तस्य यशः कलिमलापहं समस्तदुःखोपशमनं १६ प्रश्नांतरं तस्येति उदारा
णि महांति विष्णुब्रह्मादीनि सूरिभिर्नारदादिभिः कला ब्रह्मरुद्रादिमूर्तीः १७ अथेति प्रश्नांतरं अवतार
कथाः स्थित्यर्थमेव तत्तदवसरे ये मत्स्याद्यवतारास्तदाश्रयाः कथाः स्वैरं लीलां कुर्वतः श्रीकृष्णावता

सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोनुसेवया १५ को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः शुद्धि
कामो न शृणुयाद्यशः कलिमलापहं १६ तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः ब्रूहि नः =
श्रद्दधानानां लीलया दधतः कलाः १७ अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः लीला विदधतः
स्वैरमीश्वरस्यात्ममायया १८ वयं तु न वितृप्याम उत्तमश्लोक विक्र

रप्रयोजनं तु प्रश्नेनैव तच्चावतारितप्रश्नोपि
ज्ञातव्य एवेति ज्ञातव्यं १९ एवमनेकोत्स्वक्केन पुनरपि तच्चरितान्येव श्रोतुमिच्छंतः तत्रात्मनस्तृप्त्यभावमा
वेदयंति वयं त्विति योगयागादिषु तत्मताः स्म उत्तमश्लोक इति तमो यस्मादुत्तमः तथाभूतः श्लोको यशो य
स्य तस्य विक्रमे तु विशेषेण न तृप्यामः अलमिति न मन्यामहे तत्र हेतुर्यद्विक्रमं शृण्वतां यद्वान्येन
प्यतेनामवयं तु नेतित्रशाह्मस्यालयः अयमर्थः नेयामलतुष्टिर्भवति उदरादिभरणेन वा रसज्ञानेन

भा.प्र.
टी.
१
6

नत्वश्रृण्वतामित्यनेनश्रोतॄणांरसाकांक्षात्वत्रभवणमित्युक्तं रसज्ञानामित्यनेन चान्याज्ञानतः पशुवन्नृभिर्निराकृता
इत्युभयतायावद्रसमानाभावेनतृप्तिनिराकृतेति पदेपदेप्रतिक्षणमित्युत्तरोत्तरंस्वादुस्वादुतोपिस्वादु १९ अतःश्रीकृष्णस्यचरितानिक
थयेत्याहकृष्णेनाद्भुः कृतवानिति अतिमर्त्यानिमनुष्याणामसाध्यानिगोवर्द्धनोद्धरणादीनिमनुष्येषुसमंभावितानीत्य
र्थः २० ननुयजनाध्ययनादिव्यग्राणांकुतएतत् श्रवणावकाशःस्यादतआहुः कलिमागतमाज्ञाय

यच्छृण्वतांरसज्ञानांस्वादुस्वादुपदेपदे १९ कृतवान्किलवीर्याणिसहरामेणकेशवः अतिमर्त्या
निभगवान्गूढःकपटमानुषः २० कलिमागतमाज्ञायक्षेत्रेस्मिन्वैष्णवेवयं आसीनादीर्घसत्रे।
णकथायांसक्षणाःहरेः २१ त्वंनःसंदर्शितोधात्रादुस्तरंनिस्तितीर्षतां कलिंसत्त्वहरंपुंसांकर्ण
धारइवार्णवं २२ ब्रूहियोगेश्वरेकृष्णेब्रह्मण्येधर्मवर्मणि स्वांकाष्ठामधुनोपेतेधर्मःकंशरणं
द्वियाप्रीविलुप्तरंगतेकामादीर्घ \ गतः २३ इतिश्रीभागवतेप्रथमस्कंधेनैमिषोपाख्यानेप्रथ।

वैष्णवेक्षेत्रेनैमिषेनासीनाहरेःकथायांसक्षणाःकृतावसराः २१ अस्मिन्समयेत्वद्दर्शनमीश्वरेणैवसं
पादितमित्याहुर्द्वाभ्यां त्वमिति कलिंनिस्तर्तुमिच्छतामस्माकंनिस्तितीर्षतां कर्णधारोनाविकइव
२२ पुनःप्रश्नांतरंब्रूहीति धर्मस्यवर्मणिकवचवद्रक्षकेस्वांकाष्ठांमर्यादांस्वरूपमित्यर्थः अस्य।
वोक्तं कृष्णस्यधामोपगमनेधर्मस्तानादिभिःसहेत्ययंश्लोकः २३ इतिश्रीभावार्थेप्रथमस्कन्धेप्रथमो

मोध्यायः
ध्यायः

तदेवं प्रथमेऽध्याये षट्प्रश्ना मुनिभिः कृताः द्वितीयेतत्तंरसूतः चतुर्णामाहनिर्णय १ विप्राणामिति।
एवंभूतैः सम्यक्प्रश्नैः संप्रहृष्टः रोमहर्षणिः रोमहर्षणस्य पुत्रः उग्रश्रवः तेषां वचः प्रतिपूज्य सुक्ला
ना प्रवक्तुमुपक्रान्तवान् १ प्रवचनस्योपक्रमे श्रीशुकदेवं तावन्नमस्कारेति तमाह त्रिभिः तत्रस्वगुरोः।
श्रीशुकदेवस्य सर्वतत्त्ववित्तेन वक्तृयोग्यतामाह यंप्रव्रजन्तं संन्यासाय गच्छन्तं अनुपेतमनुपनयस्येति उ
पनयनाद्यमनुपासन्त्र यद्वा तकेनाप्युपेतमननुगतमेकाकिनमित्यर्थः तत्र हेतुः अपेतकृत्यं।

व्यास उवाच इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः प्रतिपूज्य वचस्तेषां प्रवक्तुमुपच
क्रमे १ सूत उवाच यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव
पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि २

कृतस्मृत्यैकर्ममार्गस्थप्रव्रजमाने नैष्ठिकत्वात् द्वैपायनः श्रीव्यासः विरहात्कातरोभीतः पुत्रइतिस्नुते
नेकृतेनाजुहाव आहूतवान् दूराद्दाह्वाने स्नेतेसत्यपि संधिरागः तदा तन्मयतया श्रीशुकदेवरूपतयात
रवोऽभिनेदुः वृक्षाः प्रत्युत्तरमुक्तवन्तः पितुः स्नेहानुरूपपरिहारायेवयोरूपं तद्रूपेणोत्तरं दत्तवानित्यर्थः तमु
निमानतोऽस्मि तन्मयत्वोपपादनाय विशेषणं सर्वभूतानां हृन्मनः अध्यात्मयोगबलेन प्रविशतीति सर्वे
भूतहृदयस्तं २ ॥

भा॰प्र॰
टी॰
७
7

कृपालुतां दर्शयन्नाह य इति ग्रंथमांद्यं तमः संसारात्मकं तितर्तुमिच्छतां पुराणानां मध्ये गुह्यं गोप्यं च
वेदैस्तुल्यं न चान्यानि विशेषणानि स्वः निजः असाधारणः अनुभावः प्रभावो यस्य तत्स्वानुभावं अखि
लश्रुतीनां सारं एकं अद्वितीयं अनुपममित्यर्थः अध्यात्मानेकार्थकारणसंज्ञानं अधिकृत्य वर्तमानं।
मात्मतत्त्वमध्यात्मं तस्य दीपं प्रकाशात्मकाशकमुपयामि शरणं व्रजामि ३ जयत्यनेन संसारमि

यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितिर्तीर्षतां तमोऽन्धं संसारिणां
करुणयाह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनां ३ ॐ नारायणं नमस्कृ
त्य नरं चैव नरोत्तमम् देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ४ मुनयः साधुपृष्टोऽहं
भवद्भिर्लोकमंगलम् यत्कृतः कृत्स्नसम्प्रश्नो येनात्मा संप्रसीदति ५ ॥

ति जयो ग्रन्थः तमुदीरयेदिति सम्बन्धः तयोदीरयेत् अन्यान्यौराणिकान्युपशितदयेति ४ नैषाव।
च्यः प्रतिपृच्छ्य इति यदुक्तं तस्य प्रतिपूजनं करोति हे मुनयः साधु यथा भवति तदेवाहहः अ
तो लोकानां मंगलमेतत् यतः श्रीकृष्णविषयः संप्रश्नः कृतः सर्वशास्त्रार्थसारोद्धारप्रश्न।
स्यापि कृष्णपर्यवसानादेवमुक्तम् ५ ॥ ०

तत्रयत्त्वयापृष्टंसर्वशास्त्रसारमैकान्तिकंश्रेयोब्रूहीति तत्रोत्तरं सवैपुंसामिति अयमर्थः धर्मोहिद्विविधः
प्रवृत्तिलक्षणोनिवृत्तिलक्षणश्च तत्रयः स्वर्गाद्यर्थः सप्रवृत्तिलक्षणः सोऽपरः यतस्तुधर्माच्छ्रवणा
दिलक्षणाभक्तिर्भवति सपरोधर्मः सएवैकान्तिकंश्रेयइति कथंभूता अहैतुकी हेतुः फलानुसंधानं
तद्रहिता अप्रतिहता विघ्नैरनभिभूता ६ ननुतर्हिवेदानुवचनेनब्राह्मणाविविदिषन्ति यज्ञेन
दानेनतपसानाशकेनेत्यादिश्रुतिभ्योधर्मस्यज्ञानांगत्वंप्रसिद्धंतत्कुतोभक्तिहेतुत्वमुच्यते सत्यंतत्तु।

सवैपुंसांपरोधर्मोयतोभक्तिरधोक्षजे अहैतुक्यप्रतिहताययात्मासुप्रसीदति ६ वासुदेवेभगव
तिभक्तियोगः प्रयोजितः जनयत्याशुवैराग्यंज्ञानंचयदहैतुकं ७ धर्मः स्वनुष्ठितः पुंसांवि।

भक्तिद्वारेणेत्याह वासुदेवइति अहै \ ष्वक्सेनकथासुयः नोत्पादयेद्यदिरतिंश्रमएवहिकेवलं।८
तुकंशुष्कतर्काद्यगोचरमौपनिषदमित्यर्थः व्यतिरेकमाह धर्मइति योधर्मइतिप्रसिद्धः सयदिविष्व
क्सेनकथासुरतिंनोत्पादयेत् तर्हिस्वनुष्ठितोपिसन् श्रमएवमोक्षेयः ननुमोक्षाफलाभावेपिधर्मस्यस्वर्गफल
मस्त्येवअतआह केवलंविफलःश्रमइत्यर्थः नन्वस्तितावत्स्वर्गादिफलमित्याशंकाएवकारेणनिरा
करोति तस्यानित्यत्वात् नतत्फलमित्यर्थः नन्वक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवतीत्यादिश्रुतेः न
तत्फलस्याक्षयित्वमित्याशंक्य[illegible]बाधयति तद्यथेहकर्मजितोलोकःक्षीयतएवमेवामुत्रपुण्य

भा॰प्र॰
टी॰
१

नन्वेवं श्रीहरौ भक्तिद्वारा नहि तत्त्ववैराग्यात्मज्ञानपर्यन्तः परो धर्म इत्युक्तं तस्या भक्तेरितरस्मिंल्लोके नि
रुह्यमत्र फलभोगे वैराग्यमन्ये तु मन्यन्ते धर्मस्यार्थः फलं तस्य च कामः फलं तस्य चेन्द्रियप्रीतिस्तत्प्री
तेश्च पुनरपि धर्मार्थादि परम्परेति तथाहुः धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते इत्यादि तं
निराकरोति धर्मस्येति द्वाभ्यां आपवर्ग्यस्योक्तन्यायेनापवर्गपर्यन्तस्य तस्यार्थोऽयं फलत्वमायातो।
नोपकल्पते योग्यो न भवति तथार्थस्याप्येवंभूतधर्माव्यभिचारिणः कामो लाभाय फलत्वाय

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते नार्थस्य धर्मैकान्तस्य कामो लाभा
य हि स्मृतः ९ कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता जीवस्य तत्त्वजिज्ञासा
नार्थो यश्चेह कर्मभिः ९ ॥

न हि स्मृतो मुनिभिः २ कामस्य विषयभोगस्य इन्द्रियप्रीतिर्लाभः फलं न भवति किन्तु यावता
जीवेत तावानेव कामस्य लाभः जीवनपर्यन्तमपेक्ष्यः कामः सेव्य इत्यर्थः यत्तूक्तं स्वाहाराद्येकर्मकृ
र्धादिनिषेधकुर्यादाहारं प्राणसंधारणार्थं प्राणाः संधार्यास्तत्त्वजिज्ञासनार्थं तत्त्वजिज्ञासा येन भू
यो न दुःखं जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारा कर्मभिर्य इह प्रसिद्धः सोऽर्थो न भवति
किन्तु तत्त्वजिज्ञासैवेति १० ॥

8A

ननु च तत्त्वजिज्ञासा नाम धर्मजिज्ञासैव धर्म एव हि तत्त्वमिति केचित्तत्राह तत्त्वविदस्तु तदेव तत्त्वं वदंति किं तत् ज्ञानं नाम अद्वयमिति क्षणिकविज्ञानपक्षं निवर्तयति ननु तत्त्वविदोऽपि विगीतवचना एव नैवं तस्यैव तत्त्वस्य नामान्तराण्यभिधानानीत्याह औपनिषदैर्ब्रह्मेति हैरण्यगर्भैः परमात्मेति सात्वतैर्भगवानिति शब्द्यते अभिधीयते ११ तच्च तत्त्वं परिकरया भक्त्यैव प्राप्यत इत्याह तच्चेत्यन्वयः ज्ञानवैराग्ययुक्तया

वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ११

तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया पश्यंत्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया १२

१२ अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम् [illegible]

१३ तस्मादेकेन मनसा भगवान्सात्वतां पतिः श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नि[illegible]

ज्ञानं परोक्षं तत्त्वमात्मनि देह एव पश्यंति किं तदात्मानं श्रुतेन वेदान्तादिश्रवणेन गृहीतया प्राप्य। येति भक्तेरौत्कृष्ट्यमुक्तं १२ धर्मस्य फलं मुक्तिः नार्थकामादिकमिति नाममर्थमुपपाद्योपसंहरति अतः इति हे द्विजश्रेष्ठा हरितोषणं हरेराधनं संसिद्धिः फलं १३ यस्माच्च भक्तिविहीनो धर्मः केवलं श्रम एव तस्माद्भक्तिप्रधान एव धर्मोऽनुष्ठेय इत्याह तस्मादिति एकेन एकाग्रेण मनसा १४ ॥ ॥

भा॰प्र॰
टी॰
६७

भक्तिरहितो धर्मः केवलं श्रम एवेति प्रपंचितं इदानीं तु भक्तेः मुक्तिफलत्वं प्रपंचयति यदिति यस्यानुध्या
नमनुध्यानं सेवासिः खड्गः तेन युक्ता विवेकिनः ग्रंथिमहंकारं निबध्नाति यत्कर्म तत् छिंदंति तस्य का
थायां रतिं प्रीतिं को न कुर्यात् १५ ननु सत्यमेवं कर्मनिर्मूलिनी श्रीहरिकथारतिस्तथापि तस्याः का
विनोत्पद्येत किं कर्म इत्यत आह शुश्रूषोरिति पुण्यतीर्थनिषेवणादिभिर्निष्पापस्य महत्सेवा स्यात्तया
च तद्धर्मश्रद्धा ततः श्रवणेच्छा ततो रुचिः स्यादित्यर्थः १६ ततश्च शृण्वतामिति पुण्ये श्रवणकीर्तने

यदनुध्यासिना युक्ताः कर्मग्रंथिनिबंधनं छिंदंति कोविदास्तस्य को न कुर्यात्कथारतिं १५
शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् १६ शृ
ण्वतां स्वकथाः कृष्णः पुण्यश्रवणकीर्तनः हृद्यंतस्थो ह्यभद्राणि विधुनोति सुहृत्सतां १७ न
ष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी १८ तदा रजस्त

ने यस्य सः सतां सुहृत् तद्धितकारी मोभावाः कामलोभादयश्च ये चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसी
हृदयानि यभद्राणि कामादिवासनास्तानि निधुनस्थः हृदयस्थः छिनत्तीत्यर्थः १७ ततश्च नष्टप्रायेष्वि
ति सर्वाभद्रनाशस्य ज्ञानोत्तरकालत्वात् प्रायग्रहणं भागवता नाम श्रीभागवतशास्त्रस्य वा सेवया
नैष्ठिकी निश्चला विहेयकाभावात् १८ रजस्तमश्च ये च तत्प्रभवा भावाः कामादयः तैरनाविद्धं प्रसन्न

9A

भगवद्भक्तियोगतः प्रसन्नमनसः अतएवमुक्तसंगस्य २० ज्ञानफलमाह भिद्यतेइतिहृदयमेवग्रंथिःचि
जडग्रंथिरूपोऽहंकारः अतएवसर्वेसंशयाः असंभावनादिरूपायाः असंभावनादिरूपाः कर्माण्यनारब्धफ
लानि आत्मनिस्वरूपभूतेईश्वरेदृष्टएवकारेणज्ञानानंतरमेवेतिदर्शयति २१ अत्रसदाचारंदर्शयन्नुप
संहरति अतइति आत्मनः प्रसादनीमनःशोधनी २२ वासुदेवभक्तिंकुर्वंतीतिभजनीयविशेषोद।

एवंप्रसन्नमनसोभगवद्भक्तियोगतः भगवत्तत्वविज्ञानंमुक्तसंगस्यजायते २० भिद्यतेहृ
दयग्रंथिःछिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणिदृष्टएवात्मनीश्वरे २१ अतोवैकवयो
नित्यंभक्तिंपरमयामुदा वासुदेवेभगवतिकुर्वंत्यात्मप्रसादनीं २२ सत्वंरजस्तमइतिप्रकृते
र्गुणास्तैर्युक्तः परःपुरुषएकइहास्यधत्ते स्थित्यादयेहरिविरिंचिहरेतिसंज्ञाःश्रेयांसितत्रख
लुसत्वतनोर्नृणांस्युः २३

र्शितः तदेवोपपादयितुंब्रह्मादीनांत्रयाणामेकात्मकत्वेपिवासु
देवस्याधिक्यमाह सत्वमिति इहअस्यएकएवपरःपुमान् अस्यविश्वस्यस्थित्यादये स्थितिसृष्टिप्रल
यार्थंसत्ताकेवलंभिन्नायते हरिविरिंचिहराइतिव्यक्तसंज्ञाधारयति तत्रतेषांमध्येश्रेयांसि शुभफ
लानिसत्वतनोर्वासुदेवाद्देवस्युः २३ ॥ ॥

उपाधिवैशिष्ट्येन फलवैशिष्ट्यं सदृष्टान्तमाह पार्थिवात् तस्य प्रवृत्तिप्रकाशरहितात् दारुणः काष्ठात् सकाशा
द्धूमः प्रवृत्तिस्वभावस्त्रयीमयो वेदोक्तकर्मप्रवर्त्तकः ईषत्त्वं कर्मप्रत्यासत्तेः तस्मादप्यग्निस्त्रयीमयः साक्षात्क
र्मसम्पादनत्वात् एवं तमसः सकाशाद्रजः रजसः सकाशात्सत्त्वं ब्रह्मदर्शनं ब्रह्मप्रकाशकं न तथा हि तेन लया
त्मकात्तमसः सकाशाद्रजसोपाधिकं ज्ञानं द्वैतत्वेन किंचिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं न तु सर्वथा
न तत्प्रकाशकत्वं विक्षेपकत्वात् आत्मत्वेन तत्साक्षाद्ब्रह्मदर्शनं अतः सत्त्वगुणोपाधीनां ब्रह्मादीनामपि य

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनं २४
भेजिरे मुनयोऽथाग्रे भगवन्तमधोक्षजं सत्त्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु तानिह २५
मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ नारायणकलाः शान्ता भजन्ति ह्यनसूयवः

थोत्तरं वैशिष्ट्यमिति भावः २४ वासुदेवभक्तौ पूर्वाचारं प्रमाणयति भेजिरे इति अथातो हेतोरग्रे पु
रा विशुद्धं सत्त्वमूर्त्तिं भगवन्तमधोक्षजं अतो ये तान् अनुवर्त्तन्ते ते इह संसारे क्षेमाय कल्पन्ते २५ ननु अन्या
नपि केचिद्भजन्तो दृश्यन्ते सत्यं मुमुक्षवस्त्वन्यान्न भजन्ति किन्तु कामा एवेत्याह मुमुक्षव इति द्वा
भ्यां भूतपतीन् पितृप्रजेशादीनामुपलक्षणं अनसूयवो देवतान्तराण्यनिन्दकाः सन्तः २६ ॥

१०

ष१

10A

रजस्तमसी प्रकृतिः स्वभावो येषां ते भूतप्रवपितृभूतादिभिः समं शीलं येषां ते श्रियासैश्वर्यप्रजाश्चेप्सन्तीति
तथा ते २० मोक्षपरत्वाद्वासुदेवो भजनीय इत्युक्तं सर्वेषां शास्त्राणां तद्गोचरत्वादित्याह द्वाभ्यां वासुदेवः परः तत्
त्वं गोचरो येषां ते नन्वेदा मखपरा इत्यपेतस्त्याशंक्य तेपि तदाराधनार्थत्वात्तत्परा इत्युक्तं योगा योगशा
स्त्राणि तेषामप्यासनप्राणायामादिक्रियापरत्वमाशंक्य तत्त्वामपि तत्प्राप्त्युपायत्वात्तत्परत्वमुक्तं २१ ज्ञान

रजस्तमःप्रकृतयः समशीला भजन्ति ये । पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः
२० वासुदेवपरा वेदा वासुदेवपरा मखा । वासुदेवपरा योगा वासुदेवपराः क्रियाः
२१ वासुदेवपरं ज्ञानं वासुदेवपरं तपः वासुदेवपरो धर्मो वासुदेवपरा गतिः २२

ज्ञानं शास्त्रं नन्वत्र ज्ञानपरमेवेत्याशंक्य तज्ज्ञानस्यापि तत्परत्वमुक्तं तपोत्र ज्ञाने धर्मो धर्मशास्त्रं दा
नव्रतादिविषयं नन्वत्र स्वर्गपरमित्याशंक्य गम्यत इति गतिः स्वर्गादिफलं तस्यापि तदानंदांशत्वरूप
त्वात्तत्परत्वमेवेत्युक्तं यद्वा वेदा इत्यनेनैव तन्मूलत्वात्सर्वेषामपि वासुदेवपराणीत्युक्तं तत्र नन्वेषां
मखयोगक्रियादीनां नानार्थपरत्वान्नैकपरत्वमित्याशंक्य मखादीनामपि तत्परत्वमित्युक्तं द्रष्टव्यं २२

ननु जगत्सर्गप्रवेशनियमादिविलासयुक्ते वस्तुनि निर्गुणे सर्वशास्त्रसमन्वयो दृश्यते कथं वा वासुदेवप
रत्वं सर्वस्येत्यत आह स एवेति चतुर्भिः एतेरवश्लोकेलस्य कर्माण्युदाराणि बुद्धीनि प्रश्नोत्तरे सदस
द्रूपया कार्यकारणात्मिकया गुणमय्येत्यन्वयः स्वतो निर्गुणोपि सन्नित्यर्थः ३० भगवतो जगत्कारण
त्वमुक्त्वा प्रवेशनियमनलक्षणां लीलामाह तयेति विलसितेषूद्भूतेषु गुणेषु आकाशादिषु अन्तः प्रवि
ष्टः सन् गुणवानिव सदसदिवाना गुणकार्याभिमानवानिव न तु वस्तुतस्तथा यतो विज्ञानेन विजृम्भितः

स एवेदं ससर्जाग्रे भगवानात्ममायया सदसद्रूपया चासौ गुणमय्यागुणो विभुः ३० तयावि
लसितेष्वेषु गुणेषु गुणवानिव अन्तः प्रविष्ट आभाति विज्ञानेन विजृम्भितः ३१ यथा ह्यव
हितो वह्निर्दारुष्वेकः स्वयोनिषु नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ३२ असौ गुणम
विजृम्भितो नूर्जितः ३१ यैर्भावैर्भूतसूक्ष्मेन्द्रियादिभिः स्वनिर्मितेषु निर्विष्टो भुङ्क्ते भूतेषु तद्गुणान्

बहुरूपत्वं लीलामाह यथेति स्वयोनिषु स्वाभिव्यंजकेषु अवहितो निहितः विश्वात्मा पुमान् परमेश्व
रो भूतेषु प्राणिषु तद्यामितोपि प्रतियोनिषु नानात्वमेवोच्यते इति ३२ तेषु तद्रूपेण चाभोगरूपां ली
लामाह असौ इति भूतसूक्ष्माणि इन्द्रियाणि चात्मा च मनस्तैः स्वयं निर्मितेषु भूतेषु च तत्तद्विषयेषु इति भो
गेषाभ्यन्तरे भोत्स्यते तद्गुणान् तत्तद्रूपान् विषयान् निष्क्रियो भुङ्क्ते भोजयतीति णिजर्थो वा ज्ञेयः पालय।

११A

इदानीं तज्ज्ञानार्थमिति यत्तोऽवतारमाह भावयति पालयति एतत्सर्वावतारसाधारणं प्रयोजनं विशेष
तः कृष्णावतारस्य कर्तीत्येतोवक्ष्यति लोकभावनो लोककर्त्ता देवादिषु ये लीलावताराः तेष्वनुरक्तः ३४
इति श्रीभावार्थदीपिकायां प्रथमस्कंधे द्वितीयोऽध्यायः २ अवतारकथा प्रोक्ता तृतीयेऽनंतरामिथः पुरु।
षाद्यवतारोत्थानानंतावतारवर्णितैः १ यदुक्तं अथाख्याहि हरेर्धीमन्नवतारकथाः शुभा इति तदुक्त
त्वेन नानावतारान् अनुक्रमिष्यन् प्रथमं पुरुषावतारमाह जगृहे इति पंचभिः महदादिभिः महदहं

भावयत्येष सत्वेन लोकान्वै लोकभावनः लीलावतारानुरतो देवतिर्यङ्नरादिषु ३४ इति
श्रीभागवते प्रथमस्कंधे द्वितीयोऽध्यायः २ सूत उवाच जगृहे पौरुषं रूपं भगवान्महदादिभिः
संभूतं षोडशकलमादौ लोकसिसृक्षया १ यस्यांभसि शयानस्य योगनिद्रां वितन्वतः नाभि

कारं पंचतन्मात्रैरेकादशेंद्रियाणि पंचमहाभूतानीति षोडश हृदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः
शकला अंशा यस्मिन् तत्तु यद्यपि भगवद्विग्रहो नैवं संभूतः तथापि विराड्जीवांतर्यामिणो भगवतो वि
राड्रूपेणोपासनार्थमेवमुक्तमिति द्रष्टव्यं १ कोसौ भगवानित्यपेक्षायां तं विशिनष्टि यस्यांभसि।
महार्णवे शयानस्य विश्वात्मस्य तत्र योगः समाधिस्तद्रूपां निद्रां विस्तारयतः तस्य नाभिरेव ह्रदः
तस्मिन्नयदंबुजं तस्मात्सकाशाद्ब्रह्मासीदभूत पाद्मे कल्पे सपौरुषरूपं जगृहे २

भा॰प्र॰
टी॰
१२
12

कीदृशं तद्रूपं तत्राह पश्यन्तीति ननु कीदृशो विग्रहस्तस्य येऽभिषिक्तेनस्मिन्नत आह तत्तस्य भगवतो रूपं विशु
द्धं रजस्तमोरहितमसिश्रं ऊर्जितं एवोर्जितं निरतिशयं सत्त्वं येन तद्धि योगिनो प्रत्यक्षमित्याह पश्यन्तीति अदो
अभ्रमनल्पं ज्ञानात्मकं चक्षुस्तेन सहस्रमपरिमितानि यानि पादादीनि तैरद्भुतं सहस्रं मूर्धादयो
यस्मिंस्तत् सहस्राणि यानि मौल्यादीनि तैरुल्लसच्छोभमानं ४ एतत्तद्रूपस्य नानात्वस्थानं वतारा
णामाविर्भावतिरोभावावदित्याह एतदादिना नारायणस्य रूपं निधीयते अस्मिन्निति निधानं कार्यावसाने

यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितं ३ पश्यन्त्य
दो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम् सहस्रमूर्धश्रवणाक्षिनासिकं सहस्र
मौल्यम्बरकुण्डलोल्लसत् ४ एतन्नानावताराणां निधानं बीजमव्ययं यस्यांशांशेन सृज्यन्ते
देवतिर्यङ्नरादयः ५ स एव प्रथमं देवः कौमारं सर्गमाश्रितः चचार दुश्चरं ब्रह्मा ब्रह्मचर्यम खण्डितम् ६

प्रवेशस्थानमित्यर्थः बीजमुद्गमस्थानं बीजत्वेऽपि नान्यबीजतुल्यं किन्त्वव्ययं न केवलमवतारा
णामेव बीजं किन्तु सर्वप्राणिनामित्याह यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिस्तेन ५ सनत्कुमारा
द्यवतारानाह स एवेति कौमारश्चार्षः प्राजापत्यो मानवः इत्यादीनि सर्गविशेषनामानि
यः पौरुषं रूपं जग्राह स एव देवः कौमाराख्यं सर्गमाश्रितः सन् ब्रह्मा ब्राह्मणो भूत्वा ब्रह्मचर्यं चचार

१२

12A

प्रथमाद्द्वितीयादिसंख्यानिर्देशमात्रापेक्षया अस्य विश्वस्य भवायोद्भवाय महीमुद्धरिष्यन्निति कर्मोक्तिः प
वं सर्वत्रावतारकर्मचोक्तमित्यनुसंधेयं ७ नारदावतारमाह तृतीयमिति ऋषिसर्गमुपेत्य तत्र देवर्षि।
त्वमुपेत्येत्यर्थः सात्वतं वैष्णवं तंत्रं पांचरात्रागमम् आचष्टोक्तवान् यतस्त्वत्राविगीतकर्मबंधहेतुत्वेपि।
भ्यस्तानि निष्कर्माणि तेषां भावो नैष्कर्म्यं कर्मणामेव मोचकत्वं यतो भवति तदाचष्ट इत्यर्थः ८ तुर्ये च।
तारे धर्मस्य भार्याः कला भार्येत्यर्थः मूर्त्तौ वा पृष्ठ आत्मनोपशमन्वीति श्रुतेः तस्यां सर्गे ऋषी भूत्वा इत्येका

द्वितीयं तु भवायास्य रसातलगतां महीं उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ७ तृतीयमृषि
सर्गं वै देवर्षित्वमुपेत्य सः तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ८ तुर्ये धर्मकलासर्गे नर
नारायणावृषी भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः ९ पंचमः कपिलो नाम सिद्धेशः का
लविप्लुतं प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं १० षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोनसूयया
आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य उचिवान्

वतारेनोद्धरिष्यति कपिलावतारमाह पंचम इति आसुरये
तत्त्वान्येव ग्रामस्तत्त्वानां ग्रामस्य समूहस्य विनिर्णयो यस्मिंस्तत्सांख्यं १० दत्तात्रेयावतारमाह षष्ठ इति
अत्रेरपत्यत्वं तेन वृतः सन् प्राप्तः अत्रेरपत्यमभिकांक्षतस्तस्याह त्वहं इति वरमानत्वात्कथं प्राप्तोनसूयया
मनसूयायाः पत्न्याः निमित्तात् मामेवापत्यं वृतवानिति दोषदृष्टिमकुर्वन्नित्यर्थः आन्वीक्षिकीं आत्मविद्यां प्रह्लादादिभ्य

भा.स्क. टी. १३

13

यज्ञावतारमाह तत इति सुयज्ञो यामाद्यैः स्वीयैर्वपुत्राद्यैर्यामानामदेवास्तद्यैः सहस्वायंभुवेनामन्व
न्तरेपालितवान् तदासयमिंद्रोभूदित्यर्थः १२ ऋषभावतारमाह अष्टमेति सर्वाश्रमनमस्कृतंमार्गं
स्वेभ्यास्मद्दर्शयन्वर्त्मधीराणांदर्शयन्नाभीर्मेरुदेव्यांप्रभुर्ऋषभोजातः १३ पृथ्व्वावतारमाह ऋषिभिरि
ति पार्थिवंवपुराजदेहंस्वयं प्राप पादानतेर्यथोरिदपार्थिवं ओषधीरित्युपलक्षणं इमांपृथिवींसर्वा
णि वस्तूनि दुग्ध्वप्रजाभ्यामभावकार्थः देवि प्रास्तेनपृथिवीदोहनेनसोयमवतारउशत्तमः कमनीय

ततः सप्तमआकूत्यांरुचेर्यज्ञोभ्यजायत सयामाद्यैःसुरगणैरपात्स्वायंभुवान्तरं १२ अष्टमेमे
रुदेव्यांतुनाभेर्जातउरुक्रमः दर्शयन्वर्त्मधीराणांसर्वाश्रमनमस्कृतं १३ ऋषिभिर्याचि
तोभेजेनवमंपार्थिवंवपुः दुग्धेमामोषधीर्विप्रास्तेनायंसउशत्तमः १४ रूपंसजगृहेमा
त्स्यंचाक्षुषोदधिसंप्लवे नाव्यारोप्यमहीमय्यामपाद्वैवस्वतंमनुं १५

तमः वशाकान्ताविन्यस्मात् १४ मत्स्यावतारमाह रूपमिति चाक्षुषमन्वन्तरेयउदधिसंप्लवः त
स्मिन्यद्यपिमन्वन्तरावसानेप्रलयोनास्ति तथापिकेनचित्कौतुकेनसत्यव्रतायमायादर्शिता
यथाकाण्डेमार्कण्डेयायेतिद्रष्टव्यम महीमय्यांनावि नौकारूपायांमह्यामित्यर्थः अपादक्षितवा
नवैवस्वतमितिभाविनीसंज्ञा १५ ॥

३

कूर्मावतारमाह सुरासुरेति कमठः कूर्मः तद्रूपेणैकादशावतारे विभुर्मन्दरं दध्रे दधार १६ धान्वन्तरावतार
माह धान्वन्तरमिति धान्वन्तरं धन्वन्तरिरूपं द्वादशमाविर्भूय प्रयोगमप्यर्थः त्रयोदशममेव रूपं तत्स्वरूपेण सद
र्शयति अपाययदिति अपाययद्दित्सुरानन्यानसुरान् मोहिन्या स्त्रिया रूपेणान्यानसुरान् मोहयन् धन्वन्तरिद्रू
पेणामृतमानीय मोहिन्या पाययदित्यर्थः १७ नृसिंहावतारमाह चतुर्दशमिति नारसिंहं रूपं वि

सुरासुराणामुदधिं मथ्नतां मंदराचलं दध्रे कमठरूपेण पृष्ठ एकादशे विभुः १६ धान्वन्तरं द्वा
दशमं त्रयोदशममेव च अपाययत्सुरानन्यान्मोहिन्या मोहयन् स्त्रिया १७ चतुर्दशं नारसिं
हं बिभ्रद्दैत्येन्द्रमूर्जितं ददार करजैरूरावेरकां कटकृद्यथा १८ पंचदशं वामनकं कृत्वागादध्व
रं बलेः पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं १९ अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृ
पान् त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं २० ततः सप्तदशे जातः सत्यवत्यां पराशरा
त् चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोल्पमे

भृत एरकं निर्वेष्टितं १८ वामनावतारमाह पंचदश
मिति वामनं नाम ह्रस्वं वामनरूपं कृत्वा वामनत्वं रूपं कृत्वा याचमानः त्रिविष्टपं दातुमिच्छुः १९ परशु
रामावतारमाह अवतार इति त्रिः त्रिगुणं यथा भवति तथा सप्तकृत्वः त्रिः सप्तवारान् निःक्षत्रियां क्षत्रिय
रहितामकरोत् २० व्यासावतारमाह तत इति अल्पमेधसो अल्पमतीन् पुंसो दृष्ट्वा वेदतरोः शाखा

भा.प्र.
टी.
२४

रामावतारमाह नरदेवत्वं राजत्वरूपेण रामः सन् अतः परमब्ध्यादेः ॥ २२ ॥ रामकृष्णावतारमाह विंश
तितम इति वक्तव्ये तकारलोपः छन्दोनुरोधेन रामकृष्णाविति ये नाम ते जन्मनी प्राप्य ॥ २३ ॥ बुद्धाव
तारमाह तत इति अञ्जनस्य सुतः अजिनसुत इति पाठे जिनः सुतः कीकटेषु मध्ये गयाप्रदेशे ।

नरदेवत्वमापन्नः सुरकार्यचिकीर्षया । समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं ॥ २२ ॥ एको
नविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी । रामकृष्णाविति भुवो भगवानहरद्भरं ॥ २३ ॥ ततः
कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषां । बुद्धो नाम्नाजिनसुतः कीकटेषु भविष्यति ॥ २४ ॥ अथासौ यु
गसन्ध्यायां दस्युप्रायेषु राजसु । जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥ २५ ॥ अवतारा ह्य
संख्येया हरेः सत्त्वनिधेर्द्विजाः । यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ २६ ॥ ऋषयो म
नवो देवा मनुपुत्रा महौजसः । कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥ २७ ॥

ये ॥ २४ ॥ कल्क्यवतारमाह अथेति युगसन्ध्यायां कलेरन्ते विष्णुयशसो ब्राह्मणात् सकाशात् जनिता ।
जनिष्यति ॥ २५ ॥ अनुक्तसर्वसंग्रहार्थमाह अवतारा इति असंख्येयत्वे दृष्टान्तः यथेति अविदासि
नः उपक्षयशून्याः दसु उपक्षये इत्यस्मात् सरसः सकाशात् कुल्याः ह्रस्वप्रवाहाः ॥ २६ ॥ विभूतीराह ऋष

२
श्री
कृष्ण
१४

14A

तत्र च विशेषमाह एते चेति पुंसः परमेश्वरस्य केचिदंशाः केचित्कलाविभूतयश्च तत्र मत्स्यादीनामवतार
त्वेन सर्वज्ञत्वसर्वशक्तित्वेपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्करणं कुमारनारदादिष्वधिकारिकेषु
यथोपयोगमंशकलावेशः पृथ्वादिषु शक्त्यावेशः कृष्णस्तु भगवान्साक्षान्नारायण एवाविर्भूतः सर्वशक्ति
त्वात् सर्वेषां प्रयोजनमाह इंद्रारयो दैत्यास्तैर्व्याकुलमुपद्रुतं लोकं मृडयंति सुखिनं कुर्वंति २८ एतच्च

एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयं इंद्रारिव्याकुलं लोकं मृडयंति युगे युगे २८
जन्म गुह्यं भगवतो य एतत्प्रयतो नरः सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते २९
एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः मायागुणैर्विरचितं महदादिभिरात्मनि ३०

कीर्तनफलमाह जन्मेति गुह्यमतिरहस्यं जन्म यस्य प्रयतः शुचिः सन् दुःखग्रामात्संसाराद्विमुच्य
ते इत्युक्ते २९ ननु कथं देहरूपसंबंधे सति तद्विमुक्तिरित्याशंक्य देहसंबंधस्य भगवन्मायायोग्यत्वाविद्यावि
लसितत्वादेतज्ज्ञवर्णादिजनिमित्तविद्यया तत्त्वविभूतिरूपपृथ्येनेरत्याशयेनाह एतदिति पंचभिः स्वस्व
रूपस्य चिदेकरसस्यात्मनो जीवस्यैतद्रूपं स्थूलशरीरं भगवतो या माया तस्या गुणैर्महदादिरूपैर्विरचितं

भा. प्र.
टी.
४४
15

कथमित्यपेक्षायामत्रप्रकारेणानन्तरश्लोकस्थितमिरदृष्टान्तमाह यथावाय्वाग्निनोमेघो वोनभसि आकाशे।
त्रुद्धिभिरेतैरारोपितः यथावापार्थिवोरेणुस्त्वदूतधूमरत्वादिमनिले एवं दृष्टृत्वादिमनिरुद्धपत्वेदृश्यत्वा
दिधर्मकं शरीरमारोपितमित्यर्थः २१ किंचअतः स्थूलाद्रूपान्तरमन्यदपि रूपमारोपितमित्यनुषंगः कथं
भूतंतत्परद्रव्यत्वंमूर्तत्वं तत्रहेतुः अवाङ्गुणात्वहितं अक्षः करचरणादिपरिणामाः तथाअपरिणामत्वा
वाङ्गुणात्वात्वंहितंरचितं आकारविशेषरहितत्वाद्द्रव्यत्वमित्यर्थः एतदेवव्युत्तरत्वाह अदृष्टाक्त

यथा नभसि मेघो वा वायोरेणुर्वा पार्थिवो निले तथा दृष्ट्रादिरूपत्वमारोपितमबुद्धिभिः २१
अतः परस्य द्रव्यत्वमवाङ्गुणात्वहितं अदृष्टान्नैवसत्त्वात्सजीवोऽयं पुनर्भवः २२

वस्तुत्वादाकारविशेषवत्त्वस्याभावात् यद्धाकारविशेषवत्त्वं तत्समस्तादिवत्तदृश्यत्वेनअध्यतेवा देहा
दिवदहत्वंनतया नहितत्समस्तत्वंकिंप्रमाणेनत्याह सजीवोजीवोपाधिः जीवोजीवेननिर्मुक्तःजीवोपनी
तविहाय इत्यादौ जीवोपाधौलिंगदेहे जीवशब्दप्रयोगात् जीवोपाधिनयाकल्पतइत्यर्थः ननुस्थूलस्येव
भोगायतनत्वाज्जीवोपाधिरस्ति किमन्यत्कल्पनेयेत्यतआह यद्यस्मात्तस्मात्पुनर्भवः पुनर्जन्मा
लोकान्तरगत्यादीनांतेनविनासंभवादितिभावः २२ ॥ ॥

नर

25A

तदेवमुपाधिद्वयमुक्त्वा तदपवादेन जीवस्य ब्रह्मतामाह यत्रेति यदेमे स्थूलसूक्ष्मरूपे स्वसंविदा स्वरूपसम्यक्
ज्ञानेन प्रतिषिद्धे भवतः ज्ञानेन प्रतिषिद्धत्वेन तमेव हेतुमाह अविद्ययात्मनि कृते कल्पिते इति हेतोः त
द्ब्रह्मतदा जीवो ब्रह्मैव भवतीत्यर्थः कथंभूतं दर्शनं ज्ञानैकस्वरूपं ३३ तथापि भगवन्मायायाः सं
सारकारणभूतायाः विद्यमानत्वात्कथं ब्रह्मता तत्राह यद्येति अमे देहे संदेहवचने यदि देवदाः मा
माणां सृतिनिवर्त्त वैशारदी विशारदः सर्वज्ञ ईश्वरः तदीया देवी समारचक्रेण क्रीडतीपुषामायया

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनम् ३३
वा यद्येषोपरता देवी माया वैशारदी मतिः संपन्न एवेति विदुर्महिम्नि स्वे महीयते ३४

यदुपरता भवति किमित्युपरता भवेत्तत्राह मतिर्विद्या अयंभावः यावदविद्यात्मना वरणाविक्षेपौ करो
ति तावत्त्वोपरमति यदा तु सैव विद्यारूपेण परिणता तदा सदसद्रूपं जीवोपाधिं दग्ध्वा निरिंधनाग्निवा
त्स्वयमेवोपरमेदिति तदा संपन्नो ब्रह्मस्वरूपं प्राप्त एवेति विदुस्तत्त्वज्ञाः किमतो यद्येवं स्वे महिम्नि पर
मानंदस्वरूपे महीयते पूज्यते विराजते इत्यर्थः ३५ ॥ ॥

यथा जीवस्य जन्मादि मायया एवमीश्वरस्यापि जन्मकर्मादि माययेत्याह एवमिति अकर्तुः कर्माणि अजनस्य
जन्मानि हृत्पतेरन्तर्यामिनः ३५ नन्वीशजीवादीश्वरस्य को विशेषः स्वातंत्र्यमेव विशेष इत्याह सवा इति
षाड्वर्गिकमिन्द्रियषड्वर्गविषयं जिघ्रति इत्यादेवाघवद्गृह्णाति न तु सज्जते इत्यर्थः कुतः षड्गुणेशः ष
डिन्द्रियनियंता ३६ ननु किमीश्वरस्य सृष्ट्यादिकर्मभिर्विषयभोगैर्वा नेत्याह न चेति धातुर्विधातुरी

जग

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च वर्णयंति स्म कवयो वेदगुह्यानि हृत्पतेः ३५ सवा
इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेस्मिन् भूतेषु चांतर्हित आत्मतंत्रः षाड्वर्गि।
कं जिघ्रति षड्गुणेशः ३६ न चास्य कश्चिन्निपुणेन धातुरवैति जंतुः कुमनीष ऊतीः ना
मानि रूपाणि मनोवचोभिः संतन्वतो नटचर्यामिवाज्ञः ३७ स वेद धातुः पदवीं परस्य दुरंत
वीर्यस्य रथांगपाणेः योऽमायया संततयानुवृत्त्या भजेत तत्पादसरोजगंधं ३८

श्वरस्य ऊतिर्जगल्ली
लाः कुमनीषा कुबुद्धिर्निपुणेन तर्कादिकौशलेन नावैति न जानाति मनसा रूपाणि वचसा नामानि संत
न्वतो विस्तारयतो वचोभिरिति नटवत्स्फुरत्यभिप्रायेण मनोवचोभिः संदेहनिवा ३७ भक्तस्तु किंचिज्जाना
तीत्याह स वेदेति अमायया अकुटिलभावेन संततया निरंतरया अनुवृत्त्या आनुकूल्येन भजेत ३८ ॥ ०

16A

भक्तिमार्गेणाप्रवृत्तानृषीन्निंदति अथेति यतो भक्त एव भगवतत्त्वं जानाति अथातो भगवंतः सर्वज्ञाः
भवेतो धन्याः कृतार्थाः कुतः यद्यस्मात् इत्थमुक्तेनमार्गेणवासुदेवे सर्वात्मभावं मनोवृत्तिं कुर्वंति स
र्वात्मकमेकांतिकं यस्मिन्नात्मभावे सति भूयः परिवर्तो जन्ममरणावर्तो न भवति ३९ सूत किमेतच्छा

अथेह धन्या भगवंत इत्थं यद्वासुदेवेऽखिललोकनाथे कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः
परिवर्त उग्रः ३९ इदं भागवतं नाम पुराणं ब्रह्मसंमितं उत्तमश्लोकचरितं चकार भगवान् ऋ
षिः ४० निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् तदिदं ग्राहयामास सुतमात्मविदां वरं ४१
सर्ववेदेतिहासानां सारं सारं समुद्धृतम् स तु संश्रावयामास महाराजं परीक्षितं ४२ प्रायोप
विष्टं गंगायां परीतं परमर्षिभिः कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ४३ कलौ नष्टदृशा
मेष पुराणार्कोऽधुनोदितः तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ४४

स्त्रं प्रश्नं त्वं कथयसीत्याह इदमिति ब्रह्मसंमितं सर्ववेदतुल्यं उत्तमश्लोकचरितं यस्मिंस्तत् ऋषिर्व्यासः ४०
तत्संप्रदायप्रवृत्तिमाह तदिदमिति सुतं शुकं ४१ ४२ प्रायेणामृत्युपर्यंतमनाशकेनोपविष्टमिति
वैराग्योक्तिः ४३ हे विप्राः विप्रर्षेः सकाशात् ४४ ॥ ॥ ०

भा॰ प्र॰
टी॰
१८
17

ग्रथ्यमानं तानवानस्मि तत्र कीर्तयतस्तत्र विविष्टेश्चेत्यन्वयः एवं द्वाभ्यां तत्र परावृत्तिरहेषः यथाधीतं यतस्मैति
विलसितं तत्र तत्पश्याम्नतिस्तु मन्यत्तु सारेण संतेषनः कश्चिन्नीविसरलाः श्रावयिष्यामि ४५ इति श्रीभावार्थ
दीपिकायां प्रथमस्कंधे तृतीयः ३ तर्थे भागवतारंभकारणत्वेन वर्ण्यते व्यासस्यापरितोषस्तु ततः प्रव
चनादिभिः १ इत्येवं प्रश्नं तत्र यावच्छ्रावयिष्यामीति ब्रुवाणं मुनीनां बहूनां मध्ये एकेन वक्तव्यो यो वृद्धः

अहं चाधिगमं तत्र निविष्टस्तदनुग्रहात् सोहं वः श्रावयिष्यामि यथाधीतं यथामतिः ४५ इति
श्रीभागवते प्रथमस्कंधे अवतारानुचरितवर्णनं नाम तृतीयोध्यायः ३ व्यास उवाच इति ब्रु
वाणं संस्तूय मुनीनां दीर्घसत्रिणां वृद्धः कुलपतिः सूतं बह्वृचः शौनकोब्रवीत् १ शौनक उ
वाच सूत सूत महाभाग वद नो वदतां वर कथां भागवतीं पुण्यां यदाह भगवाञ्छुकः २ कस्मि
वृद्धेष्वपि वद्धः श्रुतः कु न्युगे प्रवृत्तेयं स्थाने वा केन हेतुना कुतः संचोदितः कृष्णः कृतवान् संहितां
लपतिर्वेगस्वरूपः तेषपि वद्धस्पृयो बह्वृचः ऋग्वेदी तेन वक्तव्यं अतएवं भूतत्वात् शौनकोब्रवीत् १
यथा कथयामास कस्मिन् स्थाने केन हेतुना इति महाभारतादिधर्मशास्त्राणि कृतवतो मुनेरेतत्संहि
ताकरणे किं कारणमित्यर्थः कुत इति सार्वविभक्तिकस्तसिः केन प्रवर्तित इत्यर्थः कृष्णो व्यासः ३

१८

17A

पद्मं संतु सेभ्यावयामासेति तत्कुतः कस्य व्याख्यानादि किं कथं चरितमिति पृष्टं तस्यासंगोदासीनतो मार
हात्म्यो तस्येति समस्तकुमभेत्रसेतिपश्यति यतो निर्विकल्पकः स्वार्थकः निरस्तभेदः किं चैकस्मिन्नेवा
तः समाधिर्यस्या एवंभूतामतिर्यस्य सः एतदुक्तिः मायारहितानाउद्बुधः यानि याति सर्वभूतानां तस्या जाग्र
निसंयमी निस्पृहः एतदेव वस्तुतो मुकदेमूढ इव प्रतीयते ४ निर्विकल्पकत्वमपेक्ष्यति इष्ट्वेति य्या।
नाते पुत्रं प्रव्रजंतमनुयांतमनुराध्यंतमृषिर्व्यासमनयमपि रक्षा जलक्रीडन्यो देव्यो परसो ह्रियालज्ज

तस्य पुत्रो महायोगी समदृङ् निर्विकल्पकः एकांतमतिरुन्निद्रो गूढोमूढ इवेयते ४ इष्ट्वानुयां
तमृषिं मात्यजमपन्नग्रं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रम् तद्वीक्ष्य पृच्छति मुनौ जगदुस्त
वास्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः ५ कथमालक्षितः पौरैः संप्राप्तः कुरुजाङ्गलान्
यावदुन्मत्तपरीयानेकहुतवचन्यः मनतत्रमपीत्यनेनार्थोत्त उन्मत्तमूकजडवद्विचरन्गजसाह्वये ६
त्वेनोनतद्बूहमत्क तवपस्य पुत्रेनोयाश्चतः सुतस्य ह्रियानपरिदधुः ४ तथि देवी सेयंस्त्रीग्रयपुमानिति
भिदा भेदरहस्ता अस्ति विविक्ता शून्या दृष्टिर्यस्य ५ एवंभूतोसौ कथमालक्षितो लातः कुरवो जाङ्गलाश्चेति
देशविशेषाः तान्संप्राप्तः प्रथमं ततो गजसाह्वये एव विचरन् गजेनसहितः साह्वयो नाम यस्य तस्मि
न्हस्तिनापुरे हस्तीनामराजा तेन निर्मितत्वात् ६ ॥

एवंभूतेन मुनिना सह यत्र संवादः एषा सात्वती भागवती श्रुतिः संहिता ७ एतद्व्याख्याने बहुकालावस्था
नातेपतस्मान्वेक स्वस्थाने दुह्ये भमित्याह सहनि गोदोहनमात्रकालमतीतेन न दृष्टि मिलार्थं किन्तु
तेषामाश्रमं गृहं तीर्थी कुर्वन् ८ तस्मादेवंभूतोत्रव केन्याश्चर्यश्चोत्तु मलच्चरितमतो वाश्चर्यं यतो नः
कथयेत्याह ग्रामिमन्युसुतममिनिपत्यभिः राणीहि कथय ९ सममाह चक्रवर्ती वेतिवितर्के कस्य
कथं वापांडवेयस्य राजर्षेर्मुनिना सह संवादः सम भूतन्तेयत्रैषा सात्वती श्रुतिः ७ सयोद्दो
हनमात्रं हि गृहेषु गृहमेधिनां अवेक्षते महाभागः तीर्थीकुर्वंस्तदाश्रमं ८ ग्रामिमन्युसुतं
सूतप्राहुर्भागवतोत्तमं तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ९ सममाह कस्य वा हे
तोः पांडूनां मानवर्धनः प्रायोपविष्टो गंगायामनादृत्याधिराट्श्रियं १० नमन्ति यत्पादनि
केतमात्मनः शिवाय हानीय धनानि शत्रवः कथं स वीरः श्रियमंग दुस्त्यजां युवैषतोत्स्रष्टुम
वाहेतोः कस्मात् कारणादधिराट् श्रियं यत्प्रायिराज्ञो श्रियं संपदमनादृत्य १० होमहाक्षभिः ११
यस्यपादनिकेतनं चरणपीठं हस्तकरं धनान्यानीय यशात्मवोनमन्ति श्रोगादेसुत युवान कणए
व ऐषत एव त्यक्तुं प्राणमात्मने परं यस्तभिः प्राणैः सह ११ ॥ ॥ श्रीरामकृष्णाभ्यां नमः ॥ ०

१८

18A

विरक्तस्य किं धनादिभिरिति चेत्तत्राह शिवायेति लोकस्य शिवाय सुखाय भवाय भूतये समृद्ध्यै ऐश्वर्याय
चेते जीवन्ति न त्वात्मार्थं एवंसति स्वसौभाग्यानिर्विद्य विरज्य स्वयं परेषामाश्रयं कलेवरं कुतो हेतोर्मुमोच न
हि परोपजीवनस्य येषां तत्त्व सूचितमित्यर्थः १२ यत्किंचन पृष्टोसि तत्सर्वं मह्यं समाचक्ष्व यद्यस्माद्वा
चां विषये स्नातं पारंगतं त्वां मन्ये छन्दसादन्यत्र वैदिकव्यतिरेकेणात्र वैवर्णिकत्वात् १३ कस्मि

शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः जीवन्ति नात्मार्थमसौ पराश्रयं
मुमोच निर्विद्य कुतः कलेवरं १२ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन मन्ये त्वा विषया
येवाचां स्नातमन्यत्र छान्दसात् १३ सूत उवाच द्वापरे समनुप्राप्ते तृतीये युगपर्यये जातः
पराशराद्योगी वासव्यां कलया हरेः १४ स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः वि
विक्त एक आसीन उदिते रविमण्डले १५

न्युगे रस्यादिश्यानो व्यासजन्म कथयन् पूर्ववृत्तमाह
द्वापरे समनुप्राप्ते कदेत्यपेक्षायामाह तृतीये युगस्य पर्यये परिवर्ते वासव्यामुपरिचरवसोर्वीर्या
ज्जातायां सत्यवत्यां योगी ज्ञानी व्यासो जातः १४ जलमुपस्पृश्य जले स्नानादिकं कृत्वेत्यर्थः आसीनो व
भूवेति शेषः विविक्ते देशे चित्तैकाग्र्यार्थमुक्तं अनेनैव वदरिकाश्रमस्थानं सूचितं १५ ॥

भा॰प्र॰
टी॰
१९
19

तत्र महर्षेर्युगधर्मव्यतिकरं वीक्ष्य सर्ववर्णाश्रमाणां यद्धितं तद्ध्यात्वा विनिवृत्तीयेनाल्पयुः परावरज्ञ भू
तीतानागतवित् अव्यक्तरंहो वेगो यस्य तेन कालेन युगधर्माणां व्यतिकरं संकरं प्राप्तं वीक्ष्य तथा भुवि
युगेयुगे १६ भौतिकानां शरीरादीनां तत्कृतं कालकृतं निःसत्वान् धैर्यशून्यान् दुर्मेधान् मन्दमती

परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा युगधर्मव्यतिकरं प्राप्तं भुवि युगेयुगे १६ भौतिका
नां च भावानां शक्तिह्रासं च तत्कृतं अश्रद्दधानान्निःसत्वान्दुर्मेधान्ह्रसितायुषः १७ दुर्भ
गांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् १८ चातु
र्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं व्यदधाद्यज्ञसन्तत्यै वेदमेकं चतुर्विधं १९ ऋग्यजुःसामा
थर्वाख्या वेदाश्चत्वार उद्धृताः इतिहासपुराणं च पंचमो वेद उच्यते २० तत्रर्ग्वेदधरः पैलः।
सामगो जैमिनिः कविः वैशंपायन एवैको निष्णातो यजुषामुत २१ श्री

त १७ १८ ततस्तैर्होत्रोपलक्षितैः चत्वारः ऋत्विजः तत्कर्तृहोत्रादिभेदेन यत्कर्म चातुर्होत्रं शुद्धं
शुद्धिकरं यज्ञसंतत्यै यज्ञानामविच्छेदाय १९ चतुर्विधत्वमेवाह ऋगिति उद्धृताः पृथक्कृ
ताः २० २१ ॥ ॥०

१९

शाखाविभागमाह तइति।

दारुणोः थर्वोत्कामि वाराहिप्रवृत्तेः २१ व्यस्यन् विभक्त वेदः २२ वेदविभागप्रयोजनमाह तएवेति
येश्वर्वमतिमेधाविभिर्धार्यंते एव २४ किंच स्त्रीशूद्रेति द्विजबन्धवः त्रैवर्णिकेषु अधमाः तेषां कर्मश्रेयसि
सिध्यैः स्यार्थे एवं भवेत् अतएव तेषां कृपया मुनिना भारताख्यानं कृतं २५ अनेनैव प्रकारेण भव।

अथर्वांगिरसामासीत्सुमन्तुर्दारुणो मुनिः इतिहासपुराणानां पिता मे रोमहर्षणः २२ तएते
ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् २३ तएव
वेदादुर्मेधैर्धार्यंते पुरुषैर्यथा एवं चकार भगवान् व्यासः कृपणवत्सलः २४ स्त्रीशूद्रद्विज
बन्धूनां त्रयी न श्रुतिगोचरा कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह इति भारतमाख्यानं कृ
धीनचरितोचेवा कर्मश्रेयसिमूढानां श्रेयएवंभ पया मुनिना कृतम् २५ एवं प्रवृत्तस्य सदा

नाहृतं

भूतानां श्रेयसि द्विजाः सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः २६ नातिप्रसीदद्धृदयः सरस्व
त्यास्तटे शुचौ वितर्कयन् विविक्तस्थ इदं चोवाच धर्मवित् २७ धृतव्रतेन हि मया छन्दांसि गुरवो
ऽग्नयः मानिता निर्व्यलीकेन गृहीतं चानुशासनं २८

वितिभूतानां श्रेयसि हिते २६ सर्वात्मकेना अपि कर्मणा नातिप्रसीदद्धृदयः अप्रसन्नः २७ विनापि सन्तोषहेतुं वितर्कयन्निदमुवाच स्वगतं २८ निर्व्यली
केन निष्कपटेन मानिताः पूजिताः अनुशासनमाज्ञा २९ ॥

भा.प्र.
टी.
४.
20

२९ दैह्यो देहे भव आत्मा जीवोवसन्नो विभुः परिपूर्णोपि आत्मना स्वेन रूपेण असंपन्नः तादात्म्यमप्राप्त इवाभाति ब्रह्मवर्चसं स्वाध्यायनोत्कर्षजं तेजः तत्सत्तमार्थे वा ब्रह्मवर्चस्वी सत्तमोऽस्मि तस्मान्नाभाति श्रेष्ठोपि यद्वा न केवलमसंपन्न इवाभाति प्रत्युत ब्रह्मवर्चसी ब्रह्मवर्चस्ववानपि असंपन्न इवाभाति पाठांतरे कर्मनी

भारतव्यपदेशेन ह्याम्नायार्थः प्रदर्शितः दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ३० अथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः असंपन्न इवाभाति ब्रह्मवर्चस्य सत्तमः ३१ किं वा भागवता धर्मा न प्रायेण निरूपिताः प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ३२ तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः कृष्णस्य नारदोभ्यागादाश्रमं प्रागुदाहृतम् ३३ तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः पूजयामास विधिवन्नारदं सुरपूजितं ३४ इति श्रीभागवते महापुराणे व्याससंतोषकथनं नाम चतुर्थोध्यायः ४

सत्तमोपि ३१ असंपन्नत्वे हेतुः स्वयमेवाशंकते किं वेति प्रायेण भूयस्त्वेन हि यस्मात्त एव धर्माः अ-च्युतस्य प्रियाः ३२ खिलं न्यूनं खिद्यतः खेदं प्राप्नुवतः कृष्णस्य व्यासस्य प्रागुदाहृतं सरस्वतीतीरस्थं ३३ तं नारदमागतमभिज्ञाय सहसा प्रत्युत्थाय विधिवत्पूजयामास ३४ इति भागवते भावार्थदीपिकायां प्रथमस्कंधे चतुर्थोध्यायः ४ ॥ ॥

२०

20A

पंचमेसर्वधर्मेभ्योहरिकीर्तनगौरवं व्यासचित्तप्रसादायनारदेनोपदिश्यते १ उपसमीपेआसीनं वि
प्रर्षिं बृहच्छ्रवामहायशास्मयन्नीषद्धसन्निवेत्यनेनसुखप्रश्नविषयोंत्यने यद्वा इवेत्यनधिकारार्थमहो
महानपिमुह्यतीतिस्मयमानः १ शारीरःशरीराभिमानीआत्मा आत्मनातेनशरीरेणकच्चिन्नकिं
परितुष्यति मानसआत्मामनोभिमानीतेनमनसापरितुष्यति कच्चिन्नोवाइति २ जिज्ञासितं।

सूतउवाच अथतंसुखमासीनमुपासीनंबृहच्छ्रवाः देवर्षिःप्राहविप्रर्षिंवीणापाणिःस्म
यन्निव १ नारदउवाच पाराशर्यमहाभागभवतःकच्चिदात्मना परितुष्यतिशारीरआ
त्मामानसएववा २ जिज्ञासितंसुसंपन्नमपितेमहदद्भुत कृतवान्भारतंयस्त्वंसर्वार्थप
रिबृंहितं ३ जिज्ञासितमधीतंचब्रह्मयत्तत्सनातनं तथापिशोचस्यात्मानमकृतार्थइव
प्रभो ४

ज्ञातमिष्टंधर्मादियत्तत्सर्वंसुसंपन्नंसम्यक्ज्ञातमपिशाह्लादत्रुष्टितंचेत्यर्थः अपि
इतिपाठेसंबोधनं सुसंपन्नत्वेहेतुः महदद्भुतमिति सर्वैरर्थैर्धर्मादिभिःपरिबृंहितंपरिपूर्णं
३ किंच यत्सनातनंनित्यंपरंब्रह्मतच्चत्वयाजिज्ञासितंविचारितमधीतमधिगतंप्राप्तंचेत्यर्थः
तथापिशोचसितत्किमर्थमितिशेषः ४ ॥ ०

आत्मा शरीरे मानसश्च तन्मूलं तस्यापरितोषस्य कारणं अव्यक्तमस्फुटं हे नारद त्वां पृच्छामहे प्रश्नका
लेलोह आत्मभवो ब्रह्मा तस्यात्मनो देहादुद्भूतः तं अतएव अगाधो निगंभीरो बोधो यस्य तं त्वा ५ अगाध
बोधत्वे प्रमाणं च यत्त्वाह सवैइति द्वाभ्यां सर्वगुह्यं त्वं वेद तत्र हेतुः यस्मात्पुराणः पुरुषः उपासितः त्वया।
कथंभूतः परावरेशः कार्यकारणनियंता मनसैव संकल्पमात्रेण गुणैः कृत्वा विश्वं सृजती
त्यादि ६ किंच त्वं त्रिलोकीं पर्यटन् अर्क इव सर्वदर्शी योगबलेन च प्राणवायुरिव सर्वप्राणिनां॥

वेदव्यास उवाच अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे तन्मूलमव्यक्त
मगाधबोधं पृच्छामहे त्वात्मभवात्मभूतं ५ स वै भवान्वेद समस्तगुह्यमुपासितो यत्पुरु।
षः पुराणः परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसंगः ६ त्वं पर्यटन्नर्क इव।
त्रिलोकीमंतश्चरो वायुरिवात्मसाक्षी परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व ७
नारद उ० भवतानुदितप्रायं यशो भगवतोऽमलं येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलं। ८

मंतश्चरः सन् आत्मसाक्षी बुद्धिवृत्तिज्ञः अतः परे ब्रह्मणि धर्मेणोत्योगेन निस्नातस्य यद्वा तंत्यात्तव।
स्यैव इत्याचारस्तमो हिंसादानस्वाध्यायकर्माणि अपरं तु परमो धर्मो यद्योगेनात्मदर्शनं अपरे ब्रह्म
णि वेदाख्ये व्रतैः स्वाध्यायनियमैर्निस्नातस्यापि अलमत्यर्थं यन्न्यूनं तद्विचक्ष्व विविच्य कथय ७ अनुदितं।

21A

ननुभगवद्यशसएवतत्त्वतत्त्रानुवर्णितंतत्राह यथेतिचशब्दाद्धर्मादिसाधनानिच नतथाधर्मादिवत्साधा।
नैनवासुदेवस्यमहिमावोक्तइत्यर्थः ९ वासुदेवव्यतिरिक्तान्यविषयत्वात्तानवदेवान्यविषयेवाक्ताता।
येवाखिलमेवेत्याह नेति चित्रपदमपियद्वचोहरेर्यशोनप्रगृणीत तद्वायसतीर्थंकाकतुल्यं।
नैकामिनोरमन्तिस्थानमुशन्तिमन्यंते कुतः मानसाः सत्त्वप्रधानेमनसिवर्तमानाहंसायतयोग

यथाधर्मादयश्चार्थामुनिवर्यानुवर्णिताः नतथावासुदेवस्यमहि
माह्यनुवर्णिताः ९ नयद्वचश्चित्रपदंहरेर्यशोजगत्पवित्रंप्रगृ
णीतकर्हिचित तद्वायसंतीर्थमुशन्तिमानसानयत्रहंसानिरमंत्यु
शिक्क्षयाः १०

येननिरमंतिकर्हिचिदपिनिरतांनरमंते उशिक्क्षयाः उशाक्कमनीयं ब्रह्मक्षयोनिवासोयेषां
ते यथाप्रसिद्धाहंसामानसेसरसिचरन्तः कमनीयपद्मखंडेनिवासाः हिमविविचित्रान्नादिषुलेपुद्वि
ष्टगर्तेकाकक्रीडास्थानेननिरमंतेइतिसेषाः १० ॥

विनापिपरत्वात्तदेवभगवद्यशःप्रधानंवचःपवित्रमित्याह तदिति तद्वाग्विसर्गःसवाक्प्रयोगोवाग्विसर्गःवा।
चांप्रयोगः जनतानांसमूहोजनता तस्याअघंविप्लावयतिनाशयतीतितथा यस्मिन्वाग्विसर्गेबद्धवा।
त्यपिअपशब्दादियुक्तेपि प्रतिश्लोकमनंतस्ययशसांकितानिनामानिभवंति तत्रहेतुः यद्यानिनामा
निसाधवोमहांतोवक्तरिसतिशृण्वंति श्रोतरिसतिगृणंति अन्यदातुस्वयमेवगायंतिकीर्तयंती।
ति ११ भक्तिहीनंकर्मैवंथनमेवेतिकैमुतिकन्यायेनदर्शयति नैष्कर्म्यमिति निःकर्मब्रह्मतदेकका

तद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्ययशोंकितानि
यच्छृण्वंतिगायंतिगृणंतिसाधवः ११ नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनि
रंजनं कुतःपुनःशश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्यकारणं १२

रत्वान्निष्कर्मतारूपंनै
ष्कर्म्यं अंजनंतेनेतिअंजनमुपाधिःतन्निवर्तकंनिरंजनं एतदेवंभूतमपिज्ञानमच्युतेभावोभक्तिः
तद्वर्जितंचेत्अलमत्यर्थंनशोभतेनसम्यगपरोक्षायनकल्पतेइत्यर्थः तदासाधनकालेचा
भद्रंदुःखरूपंयत्काम्यंकर्मयदप्यकारणमकाम्यं तच्चेतिचकारस्यान्वयः तदपिकर्मेश्वरेना
र्पितंचेत्कुतःपुनःशोभते बहिर्मुखत्वेनसत्वशोधकत्वाभावात् १२ ॥

22A

तदेवंभक्तिशून्यानिज्ञानवाक्चातुर्यकर्मकौशलानिव्यर्थान्येवयतस्ततोहेव्यासहरिमनुवर्णयेत्याह अ-
थोयतःकारणात् अमोघापयार्थादृक् धीर्यस्य शुचिः शुद्धंश्रवोयशोयस्य सत्येरतः धृतानिव्रता-
नियेनसः भवानेवंमहागुणस्तावदतउरुक्रमस्यविविधंचेष्टितंलीलांसमाधिनाचित्तैकाग्र्येणाखि-
लस्यबंधमुक्तयेत्वमनुस्मर स्मृत्वावर्णयेत्यर्थः एतच्चवाक्यांतरमितिमध्यमपुरुषप्रयोगोनानु

अथोमहाभागभवानमोघदृक्शुचिश्रवाःसत्यरतोधृतव्रतः उरुक्रम।
स्याखिलबंधमुक्तयेसमाधिनानुस्मरतद्विचेष्टितं १३ ततोन्यथाकिं-
चनयद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः नकुत्रचित्क्वापिच।
दुःस्थितामतिर्लभेतवाताहतनौरिवास्पदं १४ ॥

एवंच १३ विपक्षेदोषांतरमाह ततउरुक्रमस्यविचेष्टितात्पृथग्दृशः अतएवान्यथाप्रकारांतरे-
णयत्किंचिद्विवक्षतोविवक्षितंतयाविवक्षयाकृतैःस्फुरितैःरूपैर्नामभिश्चवक्तव्यत्वेनोपस्थितैः दुः-
स्थितानवस्थितानासतीमतिःकदाचित्क्वापिविषयेआस्पदंस्थानंनलभेत वातेनाहताघूर्णितना-
नौरिव १४ उक्तंगीतासु व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन बहुशाखाह्यनंताश्चबुद्धयोऽव्यव-

भा.प्र.
टी.
२२
23

नदेवंहरीयशोविनाभारतादिषुकृतंधर्मादिवर्णनंनकिंचित्करमित्युक्तंप्रत्युतविरुद्धमेवजातमित्याह
जुगुप्सितमिति जुगुप्सितंनिंद्यंकाम्यकर्मादि स्वभावतएवरक्तस्यतत्ररागिणःप्रकृतस्यधर्मकृतेः।
धर्मार्थमनुशासतस्त्वमहान्नयंव्यतिक्रमः अन्यायः कुतइत्यतआह यस्यवाक्यतोधर्मएवमुख्यो
धर्मइतिस्थितः इतरःप्राकृतोजनः तस्यकाम्यकर्मादेः अन्येनतत्त्ववित्तेनक्रियमाणंनिवारणंस्व
धर्ममेववात्वयाक्रियमाणं यद्यपिअधिकारिभेदेनोक्तंतथापिस्वभावरक्तत्वानतस्यविरुद्धमेव।

जुगुप्सितंधर्मकृतेनुशासतःस्वभावरक्तस्यमहान्व्यतिक्रमः य
द्वाक्यतोधर्मइतीतरःस्थितोनमन्यतेतस्यनिवारणंजनः १५

तिभावः यद्वा नकर्मणानप्रजयाधनेनत्यागेनैकेनअमृतत्वमानशुरितिश्रुत्याक्रियमाणंनि
वारणंपर्यायमेतदितिमन्यते किंतुप्रवृत्तिमार्गानधिकृतविषयंतदितिकल्पयति तदुक्तं
मतान्तरेणापन्यासेभेदः नैवंवेदवाक्येनवक्तंयेधूपगवादयोनराः गृहस्थस्यत्वनशाक्यानिकर्तुंतेषाम्।
यविधिः नैष्ठिकंब्रह्मचर्यंवापरिव्राजकतापिवा नैरवंयपदहीनत्वानेनादावितडच्यतेइत्या
दि १५ ॥ ॥ ०

23A

वत्सेवं प्रवृत्तिमार्गो निंद्यते तर्हि निवृत्तिमार्गेणा सर्वक्रियात्यागेनैव परमेश्वरस्य तत्त्वस्वरूपानुभूतेः किंन यथाहः क
थ्यते नापि तत्राह विचक्षण इति विचक्षणो निपुणः कश्चिदेव निवृत्तितः सर्वक्रियानिवृत्त्या अस्य विभोः सु
खं निर्विकल्पकसुखात्मकस्वरूपं वेदितुं ज्ञातुमर्हतीति न पुनरविचक्षणाः प्रवृत्तिस्वभावः विभुत्वे हेतुः
नातेः कालतः पारवदेशतो यस्य तस्य विभोः चेष्टितं ननु कारुण्याद् विभोः अनात्मनो देहाद्यभिमानिनो नए
व गुणैः सत्त्वादिभिः प्रवर्तमानस्य जनस्य दर्शय भवानिति नित्वमित्यर्थः पादाब्जे हे भवानिति संबोधने १८
एवं तावत्काम्यधर्मादेरनर्थहेतुत्वान्नैवेदायपरे लीलैव वर्णनीयेत्युक्तं इदानीं तु नित्यनैमित्तिकं स्वक

विचक्षणोऽस्यार्हति वेदितुं विभोरनन्तपारस्य निवृत्तितः सुखं प्रवर्तमानस्य गुणैरनात्मनस्ततो भवान
र्दर्शय चेष्टितं विभोः १९ त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि यत्र क्व वाभद्र।
मभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वधर्मतः २०

मेविहायमप्यनादृत्य केवलं हरिभक्तिरेवोपदिश्यते
माशयेनाह त्यक्त्वेति ननु स्वधर्मत्यागेन भजन्भक्तिपरिपाकेन परिकृतार्थो भवेत्तदा न काचिच्चिन्ता यदि पु
नरपक्व एव म्रियेत ततो भ्रश्येत वा तदा स्वधर्मत्यागनिमित्तोऽनर्थः स्यादित्याशंक्याह ततो भजनात्कथंचिद्विपतेत्त
भवेत् म्रियेत वा यदि तदापि भक्तिरसिकस्य कर्मानधिकारान्नानर्थशंकामंगीकृत्याप्याह यत्रेति वाशब्दः
कटाक्षे यत्र क्व वा नीचयोनावपि अमुष्य भक्तिरसिकस्याभद्रमभूत्किं नाभूदेवेत्यर्थः भक्तिवासनासद्भावादि
त्यर्थः अभजद्भिस्तु केवलं स्वधर्मतः को वार्थ आप्तः प्राप्तः अभजतामिति षष्ठी तु संबंधमात्रविवक्षया २०

ननु स्वधर्मस्याप्यपि कर्मणा पितृलोक इति श्रुतेः पितृलोकप्राप्तिफलमस्त्येव तत्राह तस्यैवेति तस्यैव भ
जनस्यैव हेतोस्तदर्थमेव प्रयतेत कुर्यात् यदुपर्युपरि ब्रह्मपर्यन्तमधः स्थावरपर्यन्तं च भ्रमतां बहुभिर्जन्मभिर्न लभ्यते षष्ठी
तत्पुरुषेणैव तत्तु विषयसुखमन्यत एव प्राचीनकर्मणा सर्वत्र नरकादावपि लभ्यते दुःखं यथा दुः
खं प्रयत्नं विनापि लभ्यते तद्वत् तदुक्तं अप्रार्थितानि दुःखानि यथैवायान्ति देहिनां सुखान्यपि त
था मन्ये दैवमत्रातिरिच्यते १८ यदुक्तं यत्र क्व वाभद्रमभूदिति तदुपपादयति न वा इति मुकुन्दसे

तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः तल्लभ्यते दुः
खवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा १८ न वै जनो जातु कथंचना
व्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिं स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहा
तुमिच्छेन्न रसग्रहो यतः १९ ॥

वी जनः जातु कदाचित् कथंचन न कु योनिगतोऽपि संसृतिं नाप्नो
ति नवित्येव यो योगादित्याम अन्यवत् केवलकर्मनिष्ठवत् किंतु वैधर्म्यदृष्टान्तः कुत इत्यत आह मुकुन्दा
ङ्घ्र्युपगूहनमालिङ्गनं पुनः स्मरन् विहातुं नेच्छेत् यतो यं जनो रसग्रहः रसेन रसनीयेन गृह्यते व
शीक्रियते यद्वा रसनीयो ग्रहो ग्राहो यस्य तदुक्तं भगवता पतले चतनोद्भयः समिद्धोक्त त्वं नेदं सर्वा

24A

तदेवं भगवल्लीलां प्राधान्येनानुवर्णयेत्युक्तं तत्र को भगवान् का च तस्य लीला इत्यपेक्षायामाह इदमिति
इदं विश्वं भगवानेव स तस्माद्धि स्वस्मादितरः ईश्वरात्प्रपञ्चो न पृथक् ईश्वरस्तु प्रपञ्चात्पृथगित्यर्थः तत्र हे
तुः यतो भगवतो हेतोर्जगतः स्थित्यादयो भवन्ति अनेनैव लीलाप्युपदर्शिता: यद्वा इदं विश्वं भगवा
नितरश्च यः स जीवोपि भगवानेव चेतनाचेतनप्रपञ्चस्य तद्व्यतिरेकेण नास्ति सर्वैवैकसत्त्वमित्यर्थः
दिग्मात्रेण सर्वं तत्त्विदं ब्रह्मेत्यादिप्रमाणोपसूचितं तद्धि स्वयमेव भवान्वेद प्रादेशमात्रमेकदेशमात्रं

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भवाः तद्धि स्वयं वेद भवांस्तथापि ते प्रादे
शमात्रं भवतः प्रदर्शितं २० त्वमात्मनात्मानमवेह्यमोघदृक्परस्य पुंसः परमात्मनः कला अ
जं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयोधिगण्यताम् २१

प्राचार्यवाक्युक्तमेवेदंत्यादिस्फुटार्थमेव प्र
दर्शनाय प्रदर्शितम् २० न चैवं वाचार्यापेक्षा ईश्वरावतारत्वादित्याह त्वमिति हे अमोघदृक् त्वमात्म
नात्मस्वयमेवात्मानमजं सन्तं जगतः शिवाय प्रजातमवेहि कुतः परस्य पुंसः कलामंशभूतं ततः।
तस्मान्महानुभावस्य हरेरभ्युदयः पराक्रमोऽधिकमधिकं गण्यतां निरूप्यतां २१ श्रीरामकृष्णाभ्यां न
मः श्रीरामायनमः ॥

अनेनैव तपआदि सर्वं सफलं तद्व्याख्यानादित्याह इदंहीति श्रुतस्याध्ययनस्य भावेन निष्ठा इदमेव हि तपः आदी[नां]
देरविच्युतो नित्योर्थः फलं किं तत् उत्तमश्लोकस्य गुणानुवर्णनं यत् २२ सत्संगान्नो हरिकथाश्रवणा-
दि फलं स्ववृत्तांतेन प्रपंचयति अहं पुरेत्यादिना सार्द्धैः पूर्वकल्पीनेन भवे पूर्वजन्मनि वेदवादिनां दा-
स्याः सकाशादहं जातोस्मि निरूपितः नियुक्तः क्व योगिनां शुश्रूषणे प्रावृषि वर्षोपलक्षितेन चातु-

इदंहि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः अविच्युतोर्थः कविभिर्निरूपितो
यदुत्तमश्लोकगुणानुवर्णनं २२ अहं पुरातीतभवेभवं मुने दास्यास्तु कस्याश्चन वेदवादिनां
निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षतां २३ ते मय्यपेताखिलचापले-
र्भके दांतेधृतक्रीडनकेनुवर्तिनि चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोल्पभा-
षिणि २४ उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्तकिल्बिषः एवं प्रवृत्तस्य वि-
शुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते २५

र्मास्ये निर्विविक्षतां निर्वेष्टुमेकत्र वासं कर्त्तुमिच्छ-
तां २३ अपेतान्यखिलानि यस्मात्तस्मिन् नियतेंद्रिये अधृतक्रीडने अनेकान्यक्रीडासाधने अनुवर्तिनि अनु-
कूले २४ उच्छिष्टस्य लेपान् पात्रलग्नान् तैर्द्विजैरनुज्ञातः सन् भुंजे स्म तेन भोजनेनापास्तकिल्बिषो
जातोस्मि तेषां धर्मे परमेश्वरभजने एवात्मनो मनसो रुचिः प्रजायते स्मेत्यनुषंगः २५ ॥

चापलानि

:शृण्वंकृतवानस्मि १

25A

श्रुयेनपि

पशो १

:मेशृण्वतामेमैवसतः सिद्धानत्वस्येनवलाज्जनितया अतोममेतस्यापीनहसतं २६ प्रियश्रवसीत्यस्य
न्वयिन्भगवतिलब्धरुचेर्ममास्खलितामतिरभवदित्यनुषंगः यया मत्या परे प्रपञ्चातीते ब्र
ह्मरूपे मयि मदसत्स्थूलं सूक्ष्मं च एतच्छरीरं स्वमायया अविद्यया कल्पितं न तु वस्तुतोस्तीति तत्त्वा
एमेव पश्यामि अतः सत्संग एवात्मशुद्धिहेतुरिति भावः २७ एवं मम शुद्धसत्त्वप्रदायि ज्ञानं देहादि

तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः। ताः श्रद्धया मेनुपदं विशृण्वतः
प्रियश्रवस्यंग ममाभवद्रुचिः २६ तस्मिंस्तदा लब्धरुचेर्महामते प्रियश्रवस्यस्खलिता मतिर्म
म यथाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे २७ इत्थं शरत्प्रावृषिकावृतू
हरेर्विशृण्वतो मेनुसवं यशोमलं संकीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्तात्मर
जस्तमोपहा २८ तस्यैवं मेनुरक्तस्य प्रश्रितस्य हतैनसः श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य
च २९ ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितं अन्ववोचन्गमिष्यन्तः कृपया दीनवत्सलाः ३०

कृतविक्षेपनिवृत्तेः सत्त्वकारणाभूत् रजस्तमोनिवर्तिका दृढा भक्तिर्जातेत्याह इत्थमिति हरेर्यशोनुस
वं त्रिकाल २८ तस्येति शुद्धसत्त्वप्रदाय्यस्य दृढभक्तिमतो मे प्रश्रितस्य विनीतस्य २९ गुह्यतममिति सा
धनभूतं धर्मं तत्त्वज्ञानं गुह्यं तस्मात् विविक्तात्मतत्त्वं गुह्यतरं ततोपीश्वरज्ञानं गुह्यतमं भगवतो

भा०प्र०
टी०
२६
26

नैवं ज्ञानेनपूर्वोक्तं त्वपरोक्षज्ञानाद्विवेकेन दर्शयति येनैवेति अविदं ज्ञातवानहं ३१ तत्साधर्मरहस्य
सूचितमित्याह एतदिति तापत्रयस्याध्यात्मिकादेश्चिकित्सितं भेषजं निवर्तकं सत्त्वशोधकमिति।
पावनं किंतद्भगवति भावितं समर्पितं यत्कर्म तत् कथंभूते भगवति ईश्वरे सर्वनियंतरि एवमा
पिब्रह्मण्यच्युतसर्वात्मस्वरूपिणि ३२ ननु संसारहेतोः कर्मणः कथं तापत्रयनिवर्तकत्वं इति तत्र
सामग्रीभेदेन द्वयं दृष्टांतमाह द्वाभ्यां आमय इति यश्चामयो रोगो येन घृतादिना जायते

येनैवाहं भगवतो वासुदेवस्य वेधसः मायानुभावमविदं येन गच्छंति तत्पदं ३१ एतत्सं
सूचितं ब्रह्मंस्तापत्रयचिकित्सितं यदीश्वरे भगवति कर्म ब्रह्मणि भावितं ३२ आमयो यश्च भू
तानां जायते यश्च सुव्रत तदेवह्यामयं द्रव्यं न पुनाति चिकित्सितं ३३ एवं नृणां क्रियायोगाः

तदेव केवलमामयकारणभूतं \ सर्वे संसृतिहेतवः त एवात्मविनाशाय कल्प्यंते कल्पिताः प ३४

३४ द्रव्यं तमामयं न पुनाति किं वर्तयतीत्यर्थः किंतु चिकित्सितं द्रव्यांतरैर्भावितं सत्पुनात्येव यथा ३३
आत्मविनाशाय कर्माणि कुर्वते ये कल्प्यंते समर्था भवंति परे ईश्वरे कल्पिताः अर्पिताः सन्तः अत्र च
प्रथमं महत्सेवा ततस्तत्कृपा ततस्तद्धर्मश्रद्धा ततो भगवत्कथाश्रवणं ततो भगवति रतिः तया च दे
हद्वयविविक्तात्मज्ञानं ततो दृढा भक्तिः ततो भगवत्तत्वविज्ञानं ततस्तत्कृपया सर्वज्ञत्वादि भगवद्गुण

२६

26A

नतु च ज्ञानेनाज्ञाननाशकर्मनाशः न च ज्ञानं भगवति भक्तियोगाद्भवति कथं कर्मणा कर्मनाशः स्यात्तत्रा
ह यदत्रेति ३५ भगवत्तोषणं क्रियमाणं कर्म भक्तियोगं जनयतीति इति सदाचारेण दर्शयति यत्र यत्र भ
गवतः शिक्षया कर्माणि कुर्वाणा भवंति तदा कृष्णस्य गुणानामानि गृणंति अनुस्मरंति च कृष्णमित्यर्थः
इयं च भगवच्छिक्षा गीतासु यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व म

यदत्र क्रियते कर्म भगवत्परितोषणं ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितं ३५ कुर्वा।
णा यत्र कर्माणि भगवच्छिक्षयासकृत गृणंति गुणनामानि कृष्णस्यानुस्मरंति च ३६ न।
मो भगवते तुभ्यं वासुदेवाय धीमहि प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ३७ इति मू
र्त्यभिधानेन मंत्रमूर्तिममूर्तिकं यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान ३८ इमं स्वनिगमं

दर्शनमिति ३८ कीर्तनप्रकारमाह ब्रह्मन्नवेत्य मदनुष्ठितं अदान्मे ज्ञानमैश्वर्यं स्वस्मिन्भावं च केशवः।

एवं भक्तिं देवत्वसमं कं ज्ञानं देनुत्वमाह द्वाभ्यां नम इति वयमो धीमहि ध्यायामो नमस्कुर्वीमहि ३७ अमू
र्तिकं मंत्रोक्तव्यतिरिक्तमूर्तिशून्यं यजतेर्जयति एवं च कुर्वतः सम्यग्दर्शनो भवति ३८ ए
वं कृतवति मयि हरिः स्वसर्वज्ञानादिकं दत्तवानित्याह इमं स्वनिगमस्योपदेशं निगमं वेदं मयानुष्ठि

५८

भा.प्र.
टी.
२०
27

पुनस्त्वमप्येवं कर्त्तुं विन्यार त्वमिति अदभ्रमनल्पं श्रुतं यस्यामेवातो हे अदभ्रश्रुत विभो विश्रुतं विभोर्यशः
प्राख्याहि कथय येन विश्रुतेन वुद्धेन विदां विदुषां वुभुत्सितं वोद्धुमिच्छा समाप्यते यतो दुःखैः पीडितानां
क्लेशशान्तिप्रकारोऽनेन विना नास्त्येत ४० इति भावार्थदीपिकायां प्रथमस्कन्धे पञ्चमोऽध्यायः ५ व्यासस्यसत्वयचंच

त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां वुभुत्सितं प्राख्याहि दुःखैर्मुहुरर्दितात्मनां
संक्लेशनिर्वाणमुशन्ति नान्यथा ४० इति श्रीभागवते प्रथमस्कन्धे नारदोपदिष्टहरिकीर्त्तन
गौरवस्य प्राग्जन्मवर्णने नाम पञ्चमोऽध्यायः ५ सूत उवाच एवं निशम्य भगवान्देवर्षेर्जन्म
कर्म च भूयः पप्रच्छ तं ब्रह्मन्व्यासः सत्यवतीसुतः १ व्यास उवाच भिक्षुभिर्विप्रवसिते वि
ज्ञानादेष्टृभिस्तव वर्त्तमानो वयस्याद्ये ततः किमकरोद्भवान् २ स्वायंभुव कया वृत्त्या वर्त्तितं
ते परं वयः कथं चेदमुदस्राक्षीः काले प्राप्ते कलेवरं ३

षष्ठे प्राग्जन्मनं भवस्य स्वभाग्येन नारदः प्राह कृत्स्नं कथयनोद्भवं १ स्वयमपि तया चिकीर्षुं गुरूपदेशानं
तरं भावि तच्चरितं पृच्छति भिक्षुभिरिति विप्रवसिते दूरं देशागमने कृते सति विज्ञानस्यादेष्टृभिः १ परं
वयउत्तरमायुस्तत्त्वया कथं वर्त्तितं नीतं इदमिति दासीपुत्रभूतं कलेवरमुदस्राक्षीः उत्सृष्टवानसि ३ २८

एष कस्यांनेल त्वाः कालः नेस्मृतिं कथन यथातनं वेदितवान् अज्ञानामाभावत्वार्थः यतोऽयम
वेस्यनिराकृतिः अपलापो त्वानयस्मात्कः ४ अकारिघ कृतनवानेह रेफवकारयोर्विश्लेषः छेदोत्तो
येन ५ नेनस्मा वत्कचित्कालेन तेत्रेवमातृत्वेदयत्रितोन्यवसमित्याह त्रिभिः एकेति एकएवाहमा
लतोदयस्याः मायोपिन्मूढेनिवत्वेदानुवर्धेदेवः ६ किंकरीनस्यार्थप्रपचयति अस्वनेत्रामाद्य।
प्राक्कात्वविषयमेवंनस्मृतिनेस्तुरसनम नेषेषव्यथात्कालयघसर्वेनिराकृतिः ४ नारदश।
वाच मितत्मिर्विप्रवमिनेवित्ता नादेष्टिमिमम वनेमानोव्यस्याघेतनयतेदकाविष ५ एका
त्वज्ञामेजनतीयोपिन्मूढाचकिंकरी मध्यात्मजे नन्यगतो चक्रेसेहात्रुवेथन ६ सास्वनेत्रा
त्वकत्यामीयोगतेमसेमव्हेनी ईशस्यदिवसोलोकोयोगदक्ष्मयीयथा ७ अहेवनकस्य।
कृतेत्रुषिवांमत्दवेदया दिरेशाकालाब्युनत्रोवालकेःपंचहायनः ८ एकदानिर्गतोरोह्य
तोनकन्यामसयोनामीत दाफ देनीनिरिशापथि सर्पोदशत्यदाम्यृशःकृपणाकालचोदितः ९
मयीयोघतिपावसपेदृश्यातः ७ तेदेवमास्वेदचक्रे अहंचदिगादिष्वनभिज्ञोनतेवैवन्यवसमित्याह अ
हैवतास्मिनेत्रमकुलेनस्याःमातःस्वेदानुवर्थनस्यावेतयाकदाविसर्गरिनिषतीतपेत्यर्थः उपिवाल्य
मकृतवामवरस्यनःपंचवर्षः ८ गोहानिर्गतागाउहती देनोयानप्रमयः रोगनिर्गतामित्यर्थः पद।

पदेनामस्तुईश्वरकांडेतामारवेगत ५

तदात्वमेरागेणेशस्य कल्याणमिच्छत ईशस्यानुग्रहं मन्यमानः उत्तरां दिशं प्रतिप्रस्थितोस्मि १० स्फीतान्
जनपदादीनतियात इति त्रयोदशेनान्वयः जनपदादिषु नानागुणदोषयुक्तेषु
समबुद्धिः सन् गतोऽहमिति तात्पर्यं स्फीतान् जनपदान् समृद्धान्देशान् तत्र तस्यां दिशि पुरग्रामव्रजाक
रान् तत्र पुराणि राजधान्यः ग्रामा भूगृहप्रोक्ताः विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति तत्स ग्राम इति
प्रोक्तः शूद्राणां वासः पर्वत इति व्रजा गोकुलानि आकरा रत्नाद्युत्पत्तिस्थानानि तान् खेटः कर्षकग्रा

तदा तदहमीशस्य भक्तानां शमभीप्सतः अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तरां १० स्फीतान्
जनपदांस्तत्र पुरग्रामव्रजाकरान् खेटखर्वटवाटीश्च वनान्युपवनानि च ११ चित्रधातुवि
चित्राद्रीनिभभग्नभुजद्रुमान् जलाशयान् शिवजलान् नलिनीः सुरसेविताः १२ चित्रस्वनैः प
त्ररथैर्विभ्रमद्भ्रमरश्रियः १३

मः खर्वटः गिरितटग्रामः भूपत्नीवाटी एकतो यत्र तु ग्रामो नगरं चैकतः स्थितं मिश्रं तु खर्वटं नाम नदीगि
रिसमाश्रयमिति वाट्यः पुष्पवाटिकाः वनानि स्वतः सिद्धवृक्षाणां समूहाः उपवनानि रोपितवृक्षा
णां समूहरूपाणि च ११ चित्रैर्धातुभिः स्वर्णरजतादिभिर्विचित्रानद्रींश्च इभैर्भग्ना भुजाः शाखा येषां ते द्रु
मा येषु तान् शिवानि मङ्गलानि जलानि येषां तान् नलिनीः सरसीः १२ चित्राः स्वना येषां तैः पत्ररथैः प

क्षिभिस्तत्वादश्वतुद्वैरित्यर्थः विभ्रमद्भिर्भ्रमरैः श्रीर्यासां ता नलिनीः १३ ॥

२२

28A

प्रतियातोस्मि कुम्यगतः सन्नमहद्विपिनं वनमद्राक्षं कीदृशं नलवेणुशरस्तम्बैः लोभैः कुशैः कीचकैश्च गह्व-
रं दुर्गमं नलवंशवेणुजातं एवं विपुलं तरालगर्भैः कीचकाः सच्छिद्रवंशाः इति यावत् घोरं दृष्टमप्यशक्य-
दुःसहं प्रतिभयाकारं भयङ्कररूपं व्यालादीनामजिरं क्रीडास्थानमेवं दृष्टवानस्मि १४ परिश्रान्तानीन्द्रि-
याणि आत्मा देहश्च यस्य सः तृषा परीतो व्याप्तः उपस्पृश्य आचान्तः १५ पिप्पलोपस्थे अश्वत्थमूले उपविष्टः

नलवेणुशरस्तम्बकुशकीचकगह्वरं एकएवातियातोहमद्राक्षं विपिनं महत् घोरं प्रतिभया।
कारं व्यालोलूकशिवाजिरं १४ परिश्रान्तेन्द्रियात्माहं तृट्परीतो बुभुक्षितः स्नात्वापीत्वा ह्रदे नद्या
उपस्पृष्टो गतश्रमः १५ तस्मिन्निर्मनुजेरण्ये पिप्पलोपस्थ आश्रितः आत्मनात्मानमात्मस्थं य
थाश्रुतमचिन्तयं १६ ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासी
न्मे शनैर्हरिः १७ प्रेमातिभरनिर्भिन्नपुलकाङ्गोतिनिर्वृतः आनन्दसम्प्लवे लीनो नापश्यमुभयं
मुने १८ रूपं भगवतो यत्तन्मनःकान्तं शुचापहं अपश्यन् सहसोत्तस्थे वैक्लव्याद्दुर्मना इव १९

आत्मना बुद्ध्या आत्मस्थं हृदिस्थं परमात्मानं १६ भावेन भक्त्या निर्जितेन वशीकृतेन चेतसा औत्कण्ठ्ये
न यदश्रु तस्य कलापूर्णे अक्षिणी यस्य सः तस्य मे शनैर्हरिः हृदि प्रादुर्भूतः १७ प्रेम्णोतिभरेण निर्भिन्नपुलकानि
अङ्गानि यस्य आनन्दसम्प्लवे आनन्दसमुद्रे लीनो मग्नः उभयं आत्मानं परं च १८ मनसः कान्तमभीष्टं शुचः शोका

हृदि मनः प्रणिधाय स्थिरीकृत्यावितृप्तोऽस्मात् आतुर इवाभवमिति शेषः २० गिरामगोचरः संवेदनस्याविषयभूत
ईश्वरः २१ हन्तेति सानुकंपसंबोधने मा द्रष्टुमिह नार्हसि यतो न विपक्वा दग्धाः कषाया मलाः कामाद
यो येषां तेषां कुयोगिनां अनिष्पन्नयोगानामहं दुर्दर्शः अप्रत्यक्षः २२ कुतस्तर्हि दृष्टोसि तत्राह सकृद

दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि वीक्षमाणोपि नापश्यमवितृप्त इवातुरः २० ए
वं यतन्तं विजने मामाहागोचरो गिरां गंभीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव २१ हन्ता
स्मिन् जन्मनि भवान् मा मां द्रष्टुमिहार्हसि अविपक्वकषायाणां दुर्दर्शोहं कुयोगिनां २२ सकृ
द्यद्दर्शितं रूपमेतत् कामाय तेनघ मत्कामः शनकैः साधुः सर्वान् मुंचति हृच्छयान् २३ स
त्सेवयादीर्घयापि जाता मयि दृढा मतिः हित्वावद्यमिमं लोकं गन्ता मज्जनतामसि २४ मतिर्म
यि निबद्धेयं न विपद्येत कर्हिचित् प्रजासर्गनिरोधेपि स्मृतिश्च मदनुग्रहात् २५ ॥

र्शितमयेति यत् एतत्कामाय मय्यनुरागाय त्वत्कामेन किमित्यत आह मत्कामः पुमान् हृच्छयान् का
मान् सद्य एव मुंचति २३ सतां सेवया अदीर्घयापि अवद्यं निंद्यं लोके देहं हित्वा मज्जनतां मत्पार्षदतां गन्ता
सि २४ प्रजानां सर्गे सृष्टौ निरोधे संहारेपि प्रजासर्गस्य निरोधे इति वा २५ ॥ ॥

29A

तत्वमिदं महद्भूतं यन्नाम महतो भूतस्य निःश्वसितमेतद्यदृग्वेद इति श्रुतेः कीदृशमीश्वरं सर्वनियंतारं
नभसि लिंगमूर्तिर्यस्य तत्र भोलिंगमन्निहितमपि न लिंग्यते इत्यलिंगं नमेस्य रूपाय प्रवनामश्रुणा
मविरच्ये कृतवान् ग्रंथेनानुकंपितः सनम्रः १९ हतत्रयः मत्कलत्रः सनुविमत्सरो जातोस्मीति
शेषः २० काले सावसरे कालो मृत्युः प्रादुरभूदाविर्बभूव यकस्मादाविर्भावे हेतुः तडिद्रिवेति सौ
दामिनी निविशेषाणां स्फुरत्वप्रदर्शनार्थं सुदामामालानंतप्रभवो सौदामिनी मालाकार इत्यर्थः यद्वा

एतावदुक्त्वोपरराम तन्महद्भूतं नभोलिंगमलिंगमीश्वरं ग्रंथं च तस्मै महतो महीपमे शीर्षे
वनाम्बे विदधेनुकंपितः २१ नामान्यनंतस्य हतत्रयः पठन्गुह्यानि भद्राणि कृतानि च
स्मरन् (कालः प्रादुरभूत्कालेन तडित्सौदामिनी यथा) गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्र
तीक्षन्विमदो विमत्सरः २२ एवं कृष्णमतेर्ब्रह्मन्व्रसक्तस्यामलात्मनः कालः प्रादुरभूत्का
लेन तडित्सौदामिनी यथा

सुदामा पर्वतस्तस्मिन्नेके कथयन्ति निःसृतो यस्याः परिक्रमितिमय पर्वतप्रांते
भवा विद्युदिति स्फुटा भवति तद्वदित्यर्थः यद्वा तडित्पतिक इत्यर्थः तडित्पतिकान्तयोरिति मेरु
कस्मात् प्रतिके प्रादुर्भूत्वा सौदामिनीव २३ श्रीरामाय नमः श्रीगोविंदः

भा०प्र० टी० १ 30

प्रयुज्यमाने मयि नेतुमिष्यमाणे इत्यर्थः । हित्वावद्यमिमं लोकं गंतामज्जनतामसीति या भागवती भगवत्पा-
र्षदतनुर्मह्यं प्रतिश्रुता तां प्रति भगवता मयि प्रयुज्यमाने नीयमाने आरब्धं यत्कर्म त-
न्निर्वाणं समाप्तिर्यस्य आरब्धकर्मणः निर्वाणमेव निर्वाणो यस्येति वा सः पांचभौतिको देहो न्यप-
तत् अनेन पार्षदतनूनामकर्मारब्धत्वं शुद्धत्वं इत्यादि सूचितं भवति २८ इदं त्रैलोक्यमादायोपसं-
हृत्य उदन्वतः प्रकालीनांभसि शयाने श्रीनारायणे शिशयिषोः शयनेच्छोः विभोर्ब्रह्मा ।

प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुं । आरब्धकर्मनिर्वाणो न्यपतत्पांचभौतिकः २८
कल्पांत इदमादाय शयानेंऽभस्युदन्वतः । शिशयिषोरनुप्राणं विविशेंतरहं विभोः २९ सहस्र-
युगपर्यंत उत्थायेदं सिसृक्षतः । मरीचिमिश्रा ऋषयः प्राणेभ्योहं च जज्ञिरे ३० अंतर्बहिश्च
लोकांस्त्रीन्पर्येम्यस्कंदितव्रतः । अनुग्रहान्महाविष्णोरविघातगतिः क्वचित् ३१

णं तमनु प्राणनिःश्वासेन सह विविशे प्रविष्टोहं आत्मने परत्वार्थः ततो वर्षार्थ विशालादेहमाविरा-
वक्रिणः अवापवेस्तवी निद्रामेकीभूयाथ विसृजेनिति कर्मोक्तेः स्वापेनेभसि इति पाठे स्वापेन स्वप्नापुनं-
भसि शिशयिषोर्ब्रह्मणः इति श्रीनारायणेनाभेदविवक्षयोक्तमिति गमयितव्यं २९ प्राणेभ्य इंद्रियेभ्यो
देहमरीचिमिश्रा मन्वादयो ऋषयश्च जज्ञिरे ३० ये कर्मिणस्ते बहिर्निर्यांति तपआदिभिर्ब्रह्मलोकं गताः अ-
तर्निर्याति अंतरं महाविष्णोरनुग्रहादविघात इति ब्रह्मचर्यव्रतः अंतर्बहिश्च पर्येमि पर्यटामि क्वचिदप्य-

30A

किमिति पर्यटसि स्वतंत्रया लोकमंगलार्थमित्यत आह चतुर्भिः देवेनेश्वरेण दत्तां स्वराः निषादर्षभ।
गांधारषड्जमध्यमधैवत पंचमास्सप्तेति सप्त तएव ब्रह्माभिव्यंजकत्वात्तेनैव विभूषितां स्वतः सिद्धसप्तस्व।
रामित्यर्थः मूर्छयित्वा मूर्छनालापवतीं कृत्वा ३२ स्वप्रयोजनमाह प्रगायत इति ३४ पूर्वप्रयो
जनमाह एतद्धीति मात्रा विषयास्तेषां स्पर्शा भोगास्तेषामिच्छयातुराणि चित्तानि येषां तेषां

देवदत्तामिमां वीणां स्वरब्रह्मविभूषितां। मूर्छयित्वा हरीकथां गायमानश्चराम्यहं ३३ प्रगा।
यतः स्ववीर्याणि तीर्थपादो प्रियश्रवाः आहूत इव मे शीघ्रं दर्शनं याति चेतसि ३४ एतद्ध्यातुर।
चित्तानां मात्रास्पर्शेच्छया मुहुः भवसिंधुप्लवो दृष्टो हरिचर्यानुवर्णनं ३५ यमादिभिर्योगप।
थैः कामलोभहतो मुहुः मुकुंदसेवया यद्वत्तथात्माद्धा न शाम्यति ३६ सर्वं तदिदमाख्यातंय
हरिचर्यानुवर्णनं एतदेव भव \ त्पृष्टोऽहं त्वयानघ जन्मकर्मरहस्यं मे भवतश्चात्मतोषणं ३७
सिंधोः प्लवः पोतः न केवलं श्रुतिप्रमाणेन किंत्वन्वयव्यतिरेकाभ्यां दृष्ट एवेत्यर्थः ३५ एतदेवो।
क्तमन्वयद्वारेणानुभवेन दृष्टमिति यमादिभिः तथा न शाम्यति यथा मुकुंदसेवया अद्धा साक्षात्तान।
आत्मा मनः शाम्यति कथंचिन्मुकुंदसेवामात्रेणापि शाम्यति किं पुनस्तत्कृष्णवर्णनेनेति भावः ३६ भ
वतो मनः परितोषकं चाख्यातं ३७ ॥ ॥

भा॰प्र॰
टी॰
३९
31

आत्मं यावत्तावद्यायात् इच्छिकः स्वप्रयोजनं नं सं कल्पशून्यः ३८ हरिकथागायकभाग्यमाश्चर्येण अहो इति मा यन्नहृष्यन्नं नेत्यावीणया ३९ इति भावार्थदीपिकायां प्रथमस्कन्धे षष्ठोऽध्यायः ६ अथ भागवतश्रोतृजनं सवक्रो पीडितः स्वमवालवधात्द्रोणिदंडः सम्प्रमउच्यते १ तस्य नारदस्याभिप्रायं श्रुतवानसन् ब्रह्मनद्यां ब्राह्मणैरन्वितायां ब्रह्मदेवतां वा मंत्र कर्म वर्धयतीति तया २ बदरीणां खंडेन समूहेन मंडितेन

सूत उवाच एवं सम्भाष्य भगवान्नारदो वासवीसुतं आमंत्र्य वीणां रणयन्ययौ यादृच्छिको मुनिः ३८ अहो देवर्षिर्धन्योऽयं यत्कीर्तिं शार्ङ्गधन्वनः गायन्माद्यन्निदं तंत्र्या रमयत्यातुरं जगत् ३९ इति श्रीभागवते प्रथमस्कंधे नारदव्याससंवादे नाम षष्ठोऽध्यायः ६ शौनक उवाच निर्गते नारदे सूत भगवान्बादरायणः श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः १ सूत उवाच ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्धनः २ तस्मिन्स्व आश्रमे व्यासो बदरीषंडमंडिते आसीनोऽप उपस्पृश्य प्रणिदध्यौ मनः स्वयं ३ भक्तियोगेन मनसि सम्यक्प्रणिहितेऽमले अपश्यत्पुरुषं पूर्णं मायां च

नः प्रणिदध्यौ स्थिरीचकार समाधिना तु स्वरेति नारदेनोपदिष्टध्यानेन कृतवानित्यर्थः ३ प्रणिहिते निश्चले भक्तियोगेनामलेन पूर्वं प्रथम पुरुषमादिपुरुषम् मायामपश्यदित्यर्थः पूर्णमीश्वरमिति वा पाठः तदपाश्रयामीश्वराश्रयां तदा

ऽपश्यन्मायाकृतेन तु जीवात्मनः संसृतिमपश्यदित्याह ययासंमोहित इति स्वरूपावरणेन विक्षिप्तः परोपि गुणव्यति-
रिक्तोपि तत्कृतं त्रिगुणात्माभिमानकृतमनर्थं च कर्तृत्वभोक्तृत्वादिकं प्राप्नोति ५ अनर्थस्योपशामय-
तीति तथाधोक्षजे भक्तियोगमात्मनैवापश्यत् एतत्सर्वं स्वयं दृष्ट्वा एवमजानतो लोकस्यार्थे सात्वतसंहितां श्री-
भागवताख्यां चक्रे तदेवं श्लोकत्रयेण भागवतार्थः संक्षेपतो दर्शितः एतदुक्तं भवति विद्याशक्त्या
मायाया नियन्ता नित्याविर्भूतपरमानन्दस्वरूपः सर्वज्ञः सर्वशक्तिरीश्वरः तन्मायया संमोहितस्तिरोभूत-

ययासंमोहितो जीव आत्मानं त्रिगुणात्मकं परोपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ५ अनर्थोप-
शमं साक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहितां ६ यस्यां वै श्रूयमा-
णायां कृष्णे परमपूरुषे भक्तिरुत्पद्यते पुंसां शोकमोहभयापहा ७ स संहितां भागवतीं कृत्वानु-
क्रम्य चात्मजम् शुकमध्यापयामास निवृत्तिनिरतं मुनिः ८

स्वरूपलब्धिपर्यन्तधर्मी जीवः ॥
स्यैवेश्वरभक्त्या लब्धज्ञानेन मोक्ष इति तदुक्तं स्वामिना ह्लादिन्या संविदाश्लिष्टः सच्चिदानन्द ईश्वरः स्वावि-
द्यासंवृतो जीवः संक्लेशनिकराकरः तथा स ईशो यद्वशे माया स जीवो यस्तयार्दितः स्वाविर्भूतपरान-
न्दः स्वाविर्भूतः स्वादुःखभूः स्वादृगुत्थविपर्यासभवभेदजभीशुचः यन्मायया जुषन्नास्ते तमहं नृहरिं
नुम इत्यादि ६ संहितायामनर्थोपशामकत्वं दर्शयति यस्यामिति श्रूयमाणायामेव किं पुनः कृतायामित्या

श्री १ [illegible] ७ ॥

कस्यवाहेतोर्बृहतींविततांम् ९ निर्ग्रंथाग्रंथेभ्योनिर्गताः ननूक्तंगीतासु यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यचेति यद्वा ग्रंथिरेवग्रंथः निवृत्तहृदयग्रंथयइत्यर्थः ननु मुक्तानांकिंभक्त्या इत्यादिसर्वाक्षेपपरिहारार्थमाह इत्थंभूतगुणइति १० ननुतर्हिकिंकुर्वंतनामएतत्त्वाभ्यासेनशुकस्यकिंकारणमित्याह हरेरिति अध्यगादधीतवान् विष्णुजनाःप्रियायस्येतिव्याख्यानादि

शौनकउवाच सवैनिवृत्तिनिरतः सर्वत्रोपेक्षकोमुनिः कस्यवाबृहतीमेतामात्मारामःसम। भ्यसत् ९ सूतउवाच आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे कुर्वंत्यहैतुकींभक्तिमित्थं भूतगुणोहरिः १० हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः अध्यगान्महदाख्यानंनित्यंवि ष्णुजनप्रियः ११ परीक्षितोथराजर्षेर्जन्मकर्मविलापनं संस्थांचपांडुपुत्राणांवक्ष्येकृष्णक। थोदयं १२

प्रसंगेनतत्संगतिकामइतिभावः एतेनतस्यपुत्रोमहायोगीत्यादिनाशुकस्यव्याख्यानेप्रवृत्तिःकथा मिति यत्पृष्टंतस्योत्तरमुक्तं ११ यदन्यत्पृष्टंपरीक्षितःप्रायोपवेशेनश्रवणंकथमिति तस्यजन्ममहाश्च र्यमित्यादिनातस्योत्तरंवक्तुमाह परीक्षितइति विलापनंमरणंमुक्तिर्वा संस्थांमहाप्रस्थानम् श्रीकृष्ण कथानामुदयोयस्यांभवतितथा १२ ॥ ॥

32A

नेत्रपीतैर्नितो नन्वनिरूपपितिष्ठन्वोरैनावद्रर्भेस्यपवाद्रत्याम्नोर्यत्नासावाल्कोलेनरतितदृनिवत्के कथं प्र
लीनेति यदेत्यादि यदाद्रैतास्तत्यामाकृत्नास्तनानैस्रे पदीपुत्रायाणांमिशांसुपाहृहानदानत्रानाहृदन् ना
वसांल्लयन किरीटमाली मर्जुनपाहे विनूतीये नाल्वयः किमिति वालांनामिथिरांसिमानीनवानिल्पे
लयामाह मृधेपुद्देययपिपांडवाः मृपिकोरवाएव नयापिस्ननूयवत्वानो यृष्ठपुत्रः पाउवानासेना।
पतितानिसृनयानामिन्युक्तवीरयानितिस्वर्गगति मृधे मृनेनराष्ट्रकोदरेणाविहायायाहिंसायागदाया।

यदामृधे कौरवमृनयाने वीरेष्वयोवीरयानिंगतेषु वृकोदरेणाविदुग्गदाभिमर्शभग्नोरुदंडे
धृतराष्ट्रपुत्रे १३ भर्तुः प्रियेषुटोणाविनिसमपयपन् कृत्नास्तनानास्वपनायिरांसि उपाहृदपि
यिरोमवनस्यनुगुप्सितं कर्मविगहंयति १४ मानांसतनानानिधनेसिमूनानिशाम्यत्रोयपि
नेरी प्यमाना उपोस्त्रहाष्यकत्नाकुलाहीनामांल्वयेत्राहकिरीटमाली।
मभिमर्षणाणावाने नभग्नोरु

दुर्योधनस्य नथाभूते धृतराष्ट्रपुत्रेदुर्योधनेसति १३ भर्तुर्दुर्योधनस्यस्नेतिविनिर्के इतिपवंसानहितित
पयपन तस्यनहि प्रियमेवति वाक्यानरविधिपलेहेन्तुः नुगुप्सितमिति १४ द्रोणाद्रः सदृयया भवति
वाघस्यकलानामिर्विनुभिमाकुलेयाहितिणि यस्याः माकिरीटस्य कल्वेपितदयाणांवक्तानकिरीटमाली।
न्युत्कम १५ ॥

भा०म०
टी०
३३
33

अवः शोकास्त्रूनि प्रमज्जानि पतिमार्जयामि यद्यदा त्रस्मत्वं योत्र्यासामाथमस्यानततायिनइति अग्निदो गरदश्चैव च
शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते ह्याततायिनः इतिस्मरणात् अत्राततायी शस्त्रपाणिः तेन त्वं पुत्रं हत्वा
त्वं तस्य ते गांडीवादुत्थितैर्मुक्तैर्विशिखैर्बाणैः कृपादेहे त्वत्समीपमुपनयामि यत्किरस्याक्रम्यासनं विधाय
स्नपयुपुत्रासससती १६ वल्गुवो रम्या विचित्रा जल्पाभाषणानि तैः सम्यग्जेतुनः अच्युतपदमित्रसूतस्य यस्य
इत्थितो बद्धकवच उग्रधन्वा आपपस्य कपिर्हनुमान्ध्वजे यस्य सः गुरोः पुत्रं रथेनान्वाद्रवदनुधावत् १७

तदाश्रुस्वले प्रमज्जाभिभद्रे यद्रुत्वं ये शिरस्यात्ततायिनः गांडीवमुक्तैर्विशिखैर्विकृपादेस्त्वाक्रम्यय
त्वास्यमिदंर्थपुत्रा १६ इतिप्रियां वल्गुविचित्रजल्पैः समान्त्वयित्वाच्युतमित्रसूतः अन्वाद्रवद्दंशि
तउग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन १७ तमापतंतं स विलक्ष्य दूरात् कुमारहोद्विग्नमना रथेन प
आपतंतमनुधावंतं सदृष्टोति कुमारहा बालघाती प्रकंपि गाद्भवन्प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्
तहृदयः प्राणपरीप्सुः प्राणान्तलब्धुमिच्छुः न तत्कीर्तिं यावद्गमं यावद्भूतं तथा कोतावद्भुर्व्यां यावद्भवत्
यत कोद्रस्मामृगोभूत्वामुना यद्यमहातः सन् रुद्रस्य भयाद्यथा पलायते स पलायत् अर्क इति वा पाठे
वामनपुराणसूचिता तथाहि विद्युन्माली नाम कश्चिद्राक्षसो महेश्वरः तेनैकदेशो वर्णो विमानेन दत्तेन
ततो सावर्कस्य पृष्ठतो भ्रामयन् विमानदीप्त्या रात्रिं विलोपितवान् ततोर्केण निजतेजोभिर्द्रावयित्वा नद्वि

उद्विग्नमनाः ५

33A

अशरणं रक्षकरहितं न तु पलायनमेवास्तु कमलिनं तस्यापि कुंठितत्वादित्याह श्रान्ता वाजिनो यस्य तं
ब्रह्मशिरोस्त्रं ब्रह्मास्त्रं द्विजात्मजस्य द्रौणेर्दर्शितामाह १९ तदुपस्पृश्य समाहितः कृतध्यानः तदुपसंहार
मजानन्नपि संदधे हेतुः प्राणकृच्छ्र इति २० ततो भ्राजत्सर्वतो दिशं प्रादुःकृतं प्रकटीभूतं तेजोऽभिवे।
क्ष्य ततः प्राणापदं चाभिप्रेक्ष्य २१ प्रस्तुतविज्ञापनात्प्रथमं स्तौति संसृतेर्दह्यमानानां तस्या अपव।

यदाशरणमात्मानमैक्षत श्रान्तवाजिनं अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः १९
अथोपस्पृश्य सलिलं संदधे तत्समाहितः अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते २० त
तः प्रादुःकृतं तेजः प्रचंडं सर्वतो दिशं प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह २१ अर्जु
न उवाच कृष्ण कृष्ण महाभाग भक्तानामभयंकर त्वमेको दह्यमानानामपवर्गोऽसि संसृतेः २२
त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि २३
र्गः अपवर्गयिता नाशक इत्यर्थः २२ यतस्त्वमीश्वरः साक्षात् न कृतोपनः प्रकृतेः पुरुषः न कृतो यतः।
आद्यः पुराणः कारणं कारणत्वेप्यविकारितामाह मायां व्युदस्याभिभूय कैवल्यरूपे आत्मन्येवावस्थित
इति २३ श्रीरामकृष्णाभ्यां नमः ॥

त्रिवर्गदातापित्वमेवेत्याह सइति यस्त्वंमायामभिभूयस्थितः सएवमायाभिभूतस्यजनस्यधर्मादिफल
मुपादितः सन्विधत्सेवीर्येणप्रभावेन २४ तथाचानेनावतारेणानवसाध्वपदयानोलस्येनइत्याह ना
थेति किंभूभारहरणमात्रेणनभवतितत्राह स्वानांतानीनामनुध्यानायच तथानन्यभा
वानामेकांतभक्तानांच २५ एवंस्तुत्वाप्रस्तुतंविज्ञापयति किमात्मकमिदंकुतोवायातीतिविरि

सएवजीवलोकस्यमायामोहितचेतसः विधत्सेस्वेनवीर्येणश्रेयोधर्मादिलक्षणं २४ ना
थायंचावतारस्तेभुवोभारजिहीर्षया स्वानांचानन्यभावानामनुध्यानायचासकृत २५ कि
मिदंस्वित्कुतोवेतिदेवदेवनवेद्म्यहं सर्वतोमुखमायातितेजःपरमदारुणं २६ श्रीभगवा
नुवाच वेत्थेदंद्रोणपुत्रस्यब्राह्ममस्त्रंप्रदर्शितं नैवासौवेदसंहारंप्राणबाधउपस्थिते २७
नह्यस्यान्यतमंकिंचिदस्त्रंप्रत्यवकर्षणम जह्यस्त्रतेजउन्नद्धमस्त्रज्ञोह्यस्त्रतेजसा २८ ॥

तिविनेके २६ इदंद्रोणपुत्रस्यब्राह्ममस्त्रं तेनचप्राणबाधेप्राप्तेप्रदर्शितं केवलंनतुतस्योपसंहारकौशल
मित्यर्थः यतोसावुपसंहारंनवेद एतच्चत्वंवेत्थजानासि २७ प्रत्यवकर्षणंप्रशमकंनिवर्तक
मित्यर्थः यतस्तदस्त्रतेजउन्नद्धमुल्बणंब्राह्मास्त्रतेजसैवजहि यज्ञानत्व त्वमप्युत्तेचास्त्रतउपसंहृत्यस्वय

34A

तेजपरीतितो नम निरूपयिष्यन्वोदेतेनावहुंभैस्य एवास्त्रत्यामोब्रह्मास्त्रमुक्लेसेनात्तिनइति वक्तं कथया
मोति यदेत्यादि यदाद्रोणिरस्त्रत्यामा परेशाद्यवलेपएववीराःनानुहेनीतिनयाफाल्गुणोर्जुनः स्पृः
स्पृष्ट्वावमप्प नेकंमपरिक्रम्यप्रदक्षिणीकृत्य ब्रह्मायब्रह्मास्त्रेनिवनैपिवि २८ ततस्त्रोभयोर्ब्रह्मास्त्रयोः
तेजसीयोदेःसंहृत्तेसंवेष्टितेपरस्परंमिलित्वाववृधाते स्ववर्धनो किंकृत्वारोधसीद्यावापृथिव्यौ खंमन
तिरंचावृत्य यथाप्रलयसमयेसंकर्षणमुखाग्निस्पारिस्थितः सूर्यःसंहारहन्या वर्धतेतद्वत् ३० तयोर्द्वौ

सूतउवाच — श्रुत्वाभगवतःप्रोक्तंफाल्गुनःपरवीरहा स्पृष्ट्वापस्तंपरीक्रम्यब्राह्मंब्राह्मास्त्रंसं
दधे २९ संहत्यान्योन्यमुभयोस्तेजसीशरसंवृते आवृत्यरोधसीखंचववृधातेर्कवह्निवत् ३०
दृष्ट्वास्त्रतेजस्तुतयोस्त्रींल्लोकान्प्रदहन्महत् दह्यमानाःप्रजाःसर्वाःसांवर्तकममंसत ३१ प्र
जोपद्रवमालक्ष्यलोकव्यतिकरंचतं मतंचवासुदेवस्यसंजहारार्जुनोद्वयं ३२ ततआसाद्य
एपत्त्वेनत्यागेन दह्यमानाःप्रजाः तरसादारुणंगौतमीसुतं बबंधामर्षताम्राक्षःपशुंरशनयायथा
सावर्तकप्रलयाग्निममंसतमेनिरे ३१ लोकानांव्यतिकरंव्यत्ययंविनाशमित्यर्थः वासुदेवस्यमतंचाल
यब्रह्मास्त्रद्वयमुपसंहृतवान् ३२ गौतमंवंशजातागौतमीकृपीतस्याःसुतममर्षणाकोपेनताम्रेतिलो
चनमः निष्कृपलेरक्षोतः पशुयथेति तमस्यबंधनधर्मेदृष्टवरक्षोतः सृष्ट्यायातिकःपशुमिति रज्जुन

भा॰प्र॰
टी॰
३५
35

शोकोरोषादिपुत्रस्यापिअर्जुनस्य धर्मनिष्ठाख्यापनाय श्रीकृष्णवाक्यंतदाह षड्भिः शिबिरायआजा
निवेशायनेतुमिच्छंतं प्रकुपितइति ३४ अनागसोनिरपराधान् ३५ रिपोरपिसुप्तस्यबालस्यच
वधोनधर्मइत्यत्रार्थेदर्शयति मत्तमिति मत्तंमद्यादिना प्रमत्तमनवहितंउन्मत्तंग्रहद्वावानादिना

शिबिरायनिनीषंतंरज्ज्वाबद्ध्वारिपुंबलात् प्राहार्जुनंप्रकुपितोभगवानंबुजेक्षणः ३४
मैनंपार्थार्हसित्रातुंब्रह्मबंधुमिमंजहि योसावनागसःसुप्तानवधीन्निशिबालकान्
३५ मत्तंप्रमत्तमुन्मत्तंसुप्तंबालंस्त्रियंजडं प्रपन्नंविरथंभीतंनरिपुंहंतिधर्मवित् ३६
स्वप्राणान्यःपरप्राणैः प्रपुष्णात्यघृणःखलः तद्वधस्तस्यहिश्रेयोयद्दोषाद्यात्यधःपुमा
न् ३७ प्रतिश्रुतंचभवतापांचाल्यैशृण्वतोमम आहरिष्येशिरस्तस्ययस्तेमानिनिपुत्रहा
३८ तदसौवध्यतांपापआततायात्मबंधुहा भर्तुश्चविप्रियंवीरकृतवान्कुलपांसनः ३९

जडंमूढं प्रपन्नंशरणागतं विरथंभग्नरथं ३६ तद्वधोदंडरूपः तस्यैवश्रेयःपुरुषार्थः यद्य
तोदंडात्यस्मिन्नरहितात्दोषादस्मुपापानयोयाति तथाचस्मृतिः राजभिर्धृतदंडास्तुकृत्वापापानि
मानवाः विधूतकल्मषायान्तिस्वर्गंसुकृतिनोयथा ३७ ३८ तदसौवध्यतांपापआततायी ३९ ॥

३५

35A

यद्यपि चोदितः तथापि इदं तं नैच्छत् आत्महंतं पुत्रहंतारमपि यतो महान् ॥ ७ ॥ गोविंदः प्रियः सारथिर्यस्य
आत्मजानं शोचंते ॥ ७१ ॥ तथापि शिवेना हृतमानीत कर्मणो जुगुप्सितेन देषिणा वा अश्रु एवमथोमुखा
मपकृतमपकारिणा कृपया निरीक्ष्य तुष्णीं शोभनः स्वभावो यस्याः सा तन्नाम ॥ ७२ ॥ उवाचेति चकारह
येन संभ्रमः सूचितः वधने नायन मम हतो प्रसहमाना ॥ ७३ ॥ सरहस्यो गोप्यमंत्रसहितः विसर्गो ग्रहा

एवं परीक्षितार्थमेपार्थः कृष्णेन चोदितः नेच्छद्धंतुं गुरुसुतं यद्यप्यात्महंतं महान् ॥ ७ ॥ अयोपेत्य
स्वशिबिरं गोविंदप्रियसारथिः निवेदयंतं प्रियायै शोचंत्यै आत्मजान् हतान् ॥ ७१ ॥ तथाहृतं पशु
वत्पाशावद्धमवाङ्मुखं कर्मणा जुगुप्सितेन निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया न
नामच ॥ ७२ ॥ उवाचवासहंत्यस्य बंधनानयनं सती मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गु
रुः ॥ ७३ ॥ सरहस्यो धनुर्वेदः सविसर्गोपसंयमः अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ॥ ७४ ॥
स एष भगवान्द्रोणः प्रजारूपेण वर्त्तते तस्यात्मनो र्द्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी ॥ ७५ ॥

प्रयोगः उपसंयम उपसंहारः ताभ्यां सहितो अस्त्रसमूहस्त्वेति ॥ ७४ ॥ किंच तस्य द्रोणस्यात्मा देहस्तस्या
र्द्धं कृपी आस्ते अर्द्धं त्वदेतः पत्नी अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः जायापत्नी अग्निमादधीयी
ताभिनिश्रुतेः उभयोरेकाकारत्वादगमाच्च ननु भर्त्तरि मृते कथमसौ जीवतीत्याह नान्वगाद्वीरसूः

भगवद्गीता ३५

भा॰ प्र॰
टी॰
३९
36

तस्मान्नौरवं गुरोः कुलं भवद्भिः कर्तुमिच्छन्ति नेदुःखं प्राप्तुं नार्हति यतो वयं पूज्यं च ४६ मृतवत्सा मृ
तपुत्रा ४७ विपत्ते दोषमाह यैरिति तेषां राजन्यानां कुलकर्म कथंभूतं सा तु वंशं सपरिवारं शुचा
शोकेनापि त्यक्तमेव ब्रह्मकुलं कर्तुं प्रदहति ४८ धर्म्यमित्यादि यो यावद्वयसः षड्गुणाः श्वेश्लोकद्वा
दशेभ्यो दश्रव्याः तत्र धर्म्यं धर्मादनपेतं मुच्यतो मितिन्यायं न्याय्यं न्यायादनपेतं सरहस्यमित्यादि २ सक

तद्धर्म्मं तन्महाभाग भवद्भिर्गौरवं कुलं वृजिनं नार्हति प्राप्तुं पूज्यं वंद्यमभीक्ष्णशः ४६ मा रोदी
दस्य जननी गौतमी पतिदेवता यथाहं मृतवत्सार्ता रोदिम्यश्रुमुखी मुहुः ४७ यैः कोपितं
ब्रह्मकुलं राजन्यैरजितात्मभिः तत्कुलं प्रदहत्याशु सानुबंधं शुचार्पितं ४८ सूत उवाच ध
र्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत् राजा धर्मसुतो राज्ञ्याः प्रत्यनंदद्वचो द्विजाः ४९ न
कुलः सहदेवश्च युयुधानो धनंजयः भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः ५० तत्राहामा

हं तमस्यात्मनोर्थमिति
र्षितो भीमः तस्य श्रेयान्वधः स्मृतः न भर्तुर्नात्मनश्चार्थे योहन्सुप्तान् शिशून्वृथा ५१

१ निर्व्यलीकं तद्धर्म्मं तेनेति ४ समं मा रोदीदिति दुःखसाम्योक्तेः ५ महत्तं यैः कोपितमिति निष्कृष्टोक्त्या
दितोपदेशात् ६ एवंभूतं राज्ञ्या वचो हे द्विजाः प्रत्यनंदत् अनुमोदितवान् ४९ नकुलादयश्च प्रत्यनं
दन् युयुधानः सात्यकिः ५० तस्य तया विपक्षाद्रौणेर्वधः श्रेष्ठः शुभ्र न्याय्यास्य नरकपानप्रसमात न

३९

36A

चतुर्भुजो निकेतस्थो भावः भीमेपतनं दृष्ट्वा ते द्रौपद्या च सहसातन्निवारणे प्रवृत्ता यापसु भपोः सौगन्धिकायाविष्णुः
चतुर्भुजः इति संदिदानस्य सकुरजेनस्य ५२ वृथा हि ताः क्षा रोमपाप वशात्कृता ब्राह्मणो न हन्तव्यः न
या ग्रातताथि नमायामपि वेदान्तपारगा जिघांसन्तं जिघांसेत न तेन ब्रह्महा भवेदिति वदतान् तु भयमप्पमि
तु यामनमनुपालय ५३ त्वचनितिन्ता प्रयोतिप्रार्द प्रियांमा त्वयिता न्यायान्मानिष्कृतं हननं न तत्सत्यकु
निशम्य भीमगादितं द्रौपद्याश्च चतुर्भुजः ग्रालोक्य वदनं सा कुरि स्मादहसन्निव ५२ श्रीभगवानु
वाच ब्रह्मबन्धुर्न हन्तव्य ग्राततायी वधार्हणः मयैवो भयमाम्नातं परिपाह्यनुशासनं ५३ कुरु
प्रतिश्रुतं सत्यं यत्तत्सान्त्वयिता प्रिया प्रियं च भीमसेनस्य पाञ्चाल्या मह्यमेव च ५४ सूत उवाच
अर्जुनः सहसाज्ञाय हरेर्हार्दमथासिना मणिं जहार मूर्धन्यं द्विजस्य सहमूर्धजं ५५ विमुच्य
रशनाबद्धं बालहत्याहतप्रभं तेजसा मणिना हीनं शिबिरान्निरयापयत् ५६ वपनं द्रविणादा
नं स्थानान्निर्यापणं तथा एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ५७ पुत्रशोकातुराः सर्वे पाण्डवाः
सह कृष्णया स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं ५८ इति प्रथमे समवाल वधा दश
कृमसप्तम तत्ववधे भीमस्य प्रियं भवति अवध्ये द्रौपद्याः हृदयकृष्णस्य ५४ हार्दं मभिप्रायमाज्ञायमत्वा
नृपाक्कामभयं विदध्यात ग्रतोयमभिप्राय इति ज्ञात्वेत्यर्थः ग्रसिना खड्गेन मूर्धन्यं मूर्ध्नि जातं सहमू
र्द्धजं सकेशं ५५ तेजसा मणिना हीनं निरयापयन् निःसारितवान् ५६ ग्रनेन कृत्स्नोक्तं सम्पादितमित्या

भा.प्र.
टी.
१०
37

अष्टमेकृपितोद्रौणेः स्मादस्त्रात्तापपीडितः श्रीकृष्णेन च स्तुतिः कुंत्याराज्ञः शोकस्य कीर्त्यते १ तेषांउवाः संप
रेतानां स्वानामुदकेच्छतां सकृष्णाः कृष्णेन सहिताः स्त्रियास्त्रिपुरस्कृत्य प्रययुः कृत्वा तस्मिन्कार्ये स्त्रीपुरः
सरत्वविधानात् १ निनीय दत्वा हरिपादाब्जरजोभिः पूतायां सरिति गंगायां तस्या जले पुनर्गंगायाः दावपि स्ना
त्वाराम्लवेत २ कुरुपतिं युधिष्ठिरं सानुजं भीमादिभिः सहितं ३ मुनिभिः सहितः ४ कितवैर्धूर्तैर्दुर्योध

सूत उवाच अथ ते संपरेतानां स्वानामुदकमिच्छतां दातुं सकृष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः १
ते निनीयोदकं सर्वे विलप्य च भृशं पुनः आप्लुता हरिपादाब्जरजःपूतसरिज्जले २ तत्रासीनं कुरु
पतिं धृतराष्ट्रं सहानुजं गांधारीं पुत्रशोकार्तां पृथां कृष्णां च माधवः ३ सांत्वयामास मुनिभि
र्हतबंधून् शुचार्पितान् भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियां ४ साधयित्वाजातशत्रोः स्वं
राज्यं कितवैर्हृतं घातयित्वासतो राज्ञः कचस्पर्शक्षतायुषः ५ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तम
कल्पकैः तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ६ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः
द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ७ गंतुं कृतमतिर्ब्रह्मन् द्वारकां रथमास्थितः उपले
नादिभिः द्रौपद्याः कचग्रहणादिभिः क्षतं नष्टमायुर्येषां ते भेऽभिधावंतीमुत्तरां भयविह्वलां ८
तान् ५ याजयित्वेत्यादि भाविकल्पात् अत्र तेषां यशः शतमन्योः शतक्रतोरिव ६ शैनेयः शैनेर्नमा सात्यकि ३६
लेन उद्धवेन च संयुतः रथमास्थितः सन् ७ उत्तरापरीक्षिन्मातरमभिमुखं विधावंतीमुपलेभे ददर्श ८

द्वारकां

उत्तरौ

37A

श्रीकृष्णं प्रार्थयतीत्याह पाहि पाहीति द्वाभ्यां अन्यस्तु प्रार्थनायोग्यो नास्तीत्याह त्वत्तोऽन्यमभयं भयरहि-
तं न पश्यामि यत्र लोके परस्परं मृत्युर्भवति ९ तत्र प्रस्तुतं भयमावेदयति अभिद्रवति अभिद्रवति अभि-
मुखमायाति तप्तमायसं लोहमयं यस्य शल्यं स शरः अतिकार्पण्यमाह काममिति यथेच्छं मां दहतु मे ग-
र्भो मा निपात्यतां १० पराभवेनातिकुपितस्य द्रौणेः अपाण्डवं पाण्डवशून्यमिदं विश्वं कर्तुं प्रयुक्तं ब्रह्मास्त्रम्

उत्तरोवाच पाहि पाहि महायोगिन्देवदेव जगत्पते नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परं ९
अभिद्रवति मामीश शरस्तप्तायसो विभो कामं दहतु मां नाथ मा मे गर्भो निपात्यतां १० सूत उवाच
उपधार्य वचस्तस्या भगवान्भक्तवत्सलः अपाण्डवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ११ तर्ह्येव च मु-
निश्रेष्ठ पाण्डवाः पंच सायकान् आत्मनोभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः १२ व्यसनं वी-
क्ष्य तत्तेषामनन्यविषयात्मनां सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः १३ अंतःस्थः सर्वभूता-
नामात्मा योगेश्वरो हरिः स्वमाययावृणोद्गर्भं वैराट्याः कुरुतंतवे १४

तुध्यत ११ मृतएवबद्रु

मुनिवर्तदा गतमित्याह तर्ह्येव तदानीमेव ब्रह्मास्त्रस्य स्वांतैरनिवर्त्यत्वात् १२ तदुष्परिहरं व्यसनं दुःखं वी-
क्ष्य अनन्यविषय आत्मा येषां स्वैकनिष्ठानामित्यर्थः १३ वैराट्या उत्तराया अंतःस्थः सन् तद्गर्भमावृतवा-
न् यत अंतर्यामी योगेश्वरः इति बहिःस्थस्यापि प्रवेशाघटनार्थमुक्तं कुरुतंतवे कुरुसंतानाय पाण्डोः।

भा॰प्र॰
टी॰
३८
38

अमोघमप्रतिक्रियं च सममशाम्यत् उपसंशान्तमासीत् ॥१५॥ एतद्ब्रह्मास्त्रशमनमाश्चर्यं मा मंस्थाः मा मन्यस्व ॥१६॥
कृष्णयासह ॥१७॥ [illegible]नमस्ये नमस्करोमि ननु कनिष्ठा कथं नमस्करोषीत्याह आद्यं पुरुषं कुतः प्र-
कृतेः परं तत्कुतः ईश्वरं प्रकृतेरपि नियन्तारं अत एव सर्वभूतानामन्तर्बहिश्च सर्वात्मत्वेनावस्थितं न
चाप्यलक्ष्यं ॥१८॥ तत्र हेतुमाह मायेति मायैव जवनिका तिरस्करिणी तयाछन्नं अतोहमत्ताभक्ति

यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियं वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह ॥१५॥ मा मंस्था
ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते य इदं मायया देव्या सृजत्यवति हन्त्यजः ॥१६॥ ब्रह्मतेजोविनि-
र्मुक्तैरात्मजैः सह कृष्णया प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती ॥१७॥ कुन्त्युवाच नमा-
स्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परं अलक्ष्यं सर्वभूतानामन्तर्बहिरवस्थितं ॥१८॥ मायाजव-
निकाच्छन्नमज्ञाधोक्षजमव्ययं न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥१९॥ तथा परमहंसा-
योगानभिज्ञा केवलं नमस्या \ नां मुनीनाममलात्मनां भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः

मि अथः अतज्ज्ञेन ज्ञाने पश्यामि अधोक्षजं अव्ययमपरिच्छिन्नं तत्त्वप्रपञ्चः मूढदृशा देहाभिमानिना पुंसा त्व-
न लक्ष्यसे ॥१९॥ किंच परमहंसानामात्मानात्मविवेकिनां ततो मुनीनां मननशीलानामपि ततस्तमसि
तोमलानिवृत्तरागादीनामपि भक्तियोगविधानार्थं त्वामाप्तानामप्यचिंत्यनिजगुणोत्कृष्टभक्ति।
॥तथा तेन निजमहिम्नालक्ष्यसे ततो भक्तियोगं विधातुं त्वां वयं स्त्रियः कथं हि पश्येम यद्वा परमहंसानामपि॥

[illegible]

३८

38A

ज्ञानभक्त्योरयाकाङ्क्षमुक्त्वापुनः केवलंनमस्करोति कृष्णायेतिद्वाभ्यां २१ पंकजनाभोयस्य पंकजानां
मालालियस्य पंकजवत्सस्वनेत्रेयस्य पंकजाङ्कितावङ्घ्रीयस्यतस्मै २२ तत्कृतोपकारमनुस्मरति य
थेति द्वाभ्यां स्पष्टमर्थः मातृतोपिमय्यधिकानवप्रीतिः तथाहि हे हृषीकेश यथादेवकीकंसेनरुद्धा
थाविमोचिता अस्तच्चतथैव किंमोचितेतिकाङ्क्षामहान्विशेषउक्तः तविशेषंदर्शयति सातिचिरंरु
द्धासतीतस्मादेवंसकृद्विमोचिता तथाचसुचार्पिताचसतीनचतस्याः पुत्रारक्षिताः अस्तिचान्योना

कृष्णायवासुदेवायदेवकीनंदनायच नंदगोपकुमारायगोविंदायनमोनमः २१ नमःपंक
जनाभायनमःपंकजमालिने नमःपंकजनेत्रायनमस्तेपंकजांघ्रये २२ यथाहृषीकेशखल
लेनदेवकीकंसेनरुद्धातिचिरंसुचार्पिता विमोचिताहंचसहात्मजा विभोत्वयैवनाथेनमु
हुर्विपद्गणात् २३ विषान्महाग्नेः पुरुषाददर्शनादसत्सभायावनवासकृच्छ्रतः मृधेमृधेने
कमहारथास्त्रतोद्रौण्यस्त्रतश्चास्महरेभिरक्षिताः २४ विपदः सन्तुनः शश्वत्तत्रतत्रजगद्गुरो भव
तोदर्शनंयत्स्यादपुनर्भवदर्शनं
यत्तस्याममचेतिन किंतुत्वमेवतत्राह स्पष्टं तविपद्गणात्तत्रापि
लिनं अपीव्यदर्शनं श्यामं तडिद्वाससमच्युतं ८ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलं क्ष
तजाक्षं गदापाणिमात्मनः सर्वतो दिशं ९ परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुः अस्त्रतेजः
स्वगदया नीहारमिव गोपतिः १०

टं मौलिर्यस्यास्तीति तं मौलिनमिति व्रीह्यादिभ्यश्चेति निः प्रत्ययः
अपीच्यमतिसुंदरं दर्शनं रूपं यस्य तडिद्वाससं तडिद्वद्वासः पीतं यस्येति श्याममिति च पदा
भ्यां विद्युद्युक्तमेघोपमा सूचिता अच्युतमविकारं ८ तप्तं शुद्धं निर्णीयमानं कांचनं तन्मयं कुंडलं यस्य तं
क्षतजाक्षं अतो मद्भक्तस्यापि गर्भस्याद्दिप्रीउति संरंभाद्रक्ते नेत्रे मितिभावः ९ १० ॥

भा॰प्र॰ टी॰ ५८ 58

अस्मैतनः विधर्मते विनाशायं तेनीहारं हिमं गोपनिस्सूर्यरव सन्निकर्षे समीपे ददर्श दृष्ट्वा चैव असौ कस्मिन्पर्ये
तत वितर्कितवान् ११ अमेयात्मा कथं तद्विधूतवानिति अवितर्करूपः धर्मं गोपायतीति धर्मगुप् य
मेरतको व्यापकम् दशमासपरिछेद्यस्य तस्य पश्यतः तत्रैवांतर्दधे नत्वन्यत्र गतः यतो विभुः सर्व
गतः १२ उदर्के उत्तरफलम् सर्वेषां गुणानामुत्तरोत्तराधिक्यम् चकेलग्ने तत्रैव तेनः अनुकूले रवेस्तथा
दे सरितानां शुभग्रहाणामुदयो यस्मिन् जज्ञे जातः १३ जातके जातकर्म मंगलेषु गणेषु १४ व

विधर्मते सन्निकर्ष पर्येवत तकरन्यमो ११ विधूयत दमेयात्मा भगवान्धर्मगुप्विभुः मिष
तो दशमासस्य तत्रैवांतर्दधे हरिः १२ ततः सर्वगुणोदर्के सानुकूलग्रहोदये जज्ञे वंशधरः।
पांडोर्भूयः पांडुरिवोजसा १३ तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः जातकं कारया
मास वाचयित्वा च मंगलं १४ हिरण्यं गां महीं ग्रामान् हस्त्यश्वान्नृपतिर्वरान् प्रादात्स्वन्नं च।

गान्सेभ्यः तीर्थवित्दानकालतः यावच्छिद्यते नालं तावत् विप्रेभ्यः प्रजातीर्थे स तीर्थवित्
त्वायो निसृतकं छिन्ने नाले ततः पश्चात्सूतकं विधीयते इति वचनात् ततः पूर्वं शासतत् सर्वसा।
भनमन्नग्रामान्नं वा प्रजातीर्थे पुत्रोत्पत्तिपुण्यकाले पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयमिति स्मृ।
तेः देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां आयांति तदहि नृपश्रेष्ठ पुण्याहमिति चाब्रुवन् यस्मात्तद्दहः पू

हे पौरवर्षभ कुरूणां कुरुवंश्यानां १६ शुक्ले शुद्धे स्मिन् जाते तेनो दैवेन कथंभूतेनाप्रतिघातेन दुर्नि
वारेण संस्थां नाशमुपेयुषि गते सति वो युष्माकमनुग्रहार्थाय यस्मात् प्रभवनशीलेन श्रीविष्णुना रातो दत्तः १७
तस्माल्लोके विष्णुरात इति नाम्ना भविष्यति महाभागवतश्रेष्ठो गुणैश्च महांश्च भविष्यति नात्र संदेह इति
हे राजन् ब्राह्मणा ऊचुरिति त्रयाणामन्वयः १८ महाभागवतो भविष्यतीत्युक्ते हृष्टः पृच्छति अपिस्वि

तमश्चुर्वर्यं स्खलतां स्नुषा राजानां प्रथयान्वितं एष ह्यस्मिन् जाते तेनो कुरूणां पौरवर्षभ १६ दैवे
नाप्रतिघातेन शुक्ले संस्थामुपेयुषि रातो वो ऽनुग्रहार्थाय विष्णुना प्रभविष्णुना १७ तस्मान्ना
म्ना विष्णुरात इति लोके बृहच्छ्रवाः भविष्यति न संदेहो महाभागवतो महान् १८ युधिष्ठि
र उवाच अप्येष वंश्यान् राजर्षीन् पुण्यश्लोकान् महात्मनः अनुवर्तिता स्विद्यशसा साधुवा
देन सत्तमाः १९ ब्राह्मणा ऊचुः पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः ब्रह्मण्यः।
सत्यसंधश्च रामो दाशरथिर्यथा २०

त किंस्वित् साधुवादेन यशसा सत्कीर्त्या अनुवर्तिता भविष्यतीति हे सर्वश्रेष्ठो वा तः पार्थ युधिष्ठिरः
१९ प्रजानामविता रक्षकः मानवो मनोः पुत्रः ब्राह्मणो हितः सत्यप्रतिज्ञश्च श्रीरामो यथा २० श्रीराम

उशीनरदेशाधिपतिः शिबिः येन स्वमांसं श्येनाय दत्वा शरणागतः कपोतो रक्षितः स्वानां ज्ञातीनां यज्वनां
यशोविस्तारको दौष्यन्तिर्भरत इव २१ अर्जुनयोः पार्थकार्तवीर्ययोः २२ हिमवानिव सन्तो निषेव्यः अनन्य
गतिकत्वेन वसुधेव तितिक्षुः तोनाप्रीत्या मातापितराविव सहिष्णुः २३ पितामहो ब्रह्मा तेन समः सा

एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनां २१ धन्वि
नामग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः हुताशा इव दुर्द्धर्षः समुद्र इव दुस्तरः २२ मृगेंद्र इव विक्रा
न्तो निषेव्यो हिमवानिव तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव २३ पितामहसमः साम्ये प्र
सादे गिरिशोपमः आश्रयः सर्वभूतानां यथा देवो रमाश्रयः २४ सर्वसद्गुणमाहात्म्ये एष कृष्ण
मनुव्रतः रन्तिदेव इवोदारो ययातिरिव धार्मिकः २५ धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्र
हः आहर्त्तैषोश्वमेधानां वृद्धानां पर्युपासकः २६ राजर्षीणां जनयिता शास्ता चोत्पथगामि
नां निग्रहीता कलेरेष भुवो धर्मस्य कारणात् २७ तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जनात्
प्रपत्स्यत उपश्रुत्य मुक्तसंगः पदं हरेः २८

साम्ये समत्वे रमाश्रयो हरिः २४ सर्वैः सद्गुणैः
र्यन्माहात्म्यं तस्मिन् श्रीकृष्णमनुव्रतः २५ धृत्या धैर्येण सन्नु भद्रो ग्रहो निवेशो यस्य आहर्त्ता कर्त्ता
२६ २७ द्विजपुत्रेण प्रेरितात् तक्षकादात्मनो मृत्युमुपश्रुत्य हरेः पदं प्रपत्स्यते भजिष्यति २८ ॥॥

राजर्षीणां जनमेजयादीनां १

५९

59A

ततश्च जित्वा मित्रमात्मनोर्यथा न्यायेनमः इदंवामोरिंगेगमायोदित्वाकुतोभयंयमाप्स्यति २६ लब्धाउपचितिः
प्रजाये: ३ परीक्षिदितिनामनिर्वक्ति सएषप्रभृति यद्यस्मात्प्रभुः समर्थः सन् गर्भेदृष्टपुरुषमनुध्याय
परितः दृश्यमानेषु नरेषु मध्येसर्वमपि नरंपरीक्षेत अयमसौ भवेदिति नो वाइतिविचारयेदतः परी
क्षिदितिविख्यातः पूर्वदृष्टमितिपाठः ३० शुक्लेपक्षेचन्द्रमपते नरेषु प्रसिद्धउडुपोन्वहं यथा काष्ठाभिः पंचद

शितासिताभ्यां यथा न्यायेनशुभेनर्व्यामस्ततादसौः दित्वेदेवर्षिपगेंगायांयायात्स्पत्स्यद्वाकुतोभयं २६ सू
तउवाच इतिराजउपादिश्यविप्राजानककोविदाः लब्धोपचितयःसर्वेप्रतिजग्मुःस्वकान्
गृहान् ३ सएषलोकविख्यातःपरीक्षिदितियःप्रभुः पूर्वदृष्टमनुध्यायन्परीक्षेतनरेष्विह ३१
सराजपुत्रोववृधेआशुशुक्लइवोडुपः आपूर्यमाणःपितृभिःकाष्ठाभिरिवसोन्वहं ३२ यक्ष्यमा
णोश्वमेधेनज्ञातिद्रोहजिहासया राजालब्धधनोदध्यौनान्यत्रकरदंडयोः ३३ तदभिप्रेतमाल
क्ष्यभ्रातरोच्युतचोदिताः धनंप्रहीनमाजह्रुरुदीच्यां

राकलाभिरापूर्यमाणोवर्धते एवंपितृभिर्गु
पिशिराद्रिभिः काष्ठैः चतुःषष्टिः कलाभिरापूर्यमाणोववृधे ३२ पूर्वमपक्रुष्णोक्ताद्वयमेधानस्वावस
रेमप्रकारंकथयति ज्ञातिद्रोहस्यहानेच्छयायक्ष्यमाणः करदंडयोरन्यत्रधनाभावाविनानलब्धधनःसन्ध्यौ
चिंतयामास ३३ करदंडधनस्यापरिजनभयात्मातोपतीनात्वात्यहीतमकृतमस्यप्रजत्तदानेयोग्यदीच्यादिशि।

द्विजिभूरिशः २४

भूरियंने ब्राह्मणोः त्वकं स्वर्णपात्रादिकमानीतवेतः २४

तेन संभृत संभारः संप्रहरिनयज्ञोपकरणः भीतो ज्ञातिद्रोहात् २५.२७ इति श्रीभावार्थे प्रथमे द्वादशः १२
निर्गमो धृतराष्ट्रस्य विदुरोक्त्याविचारोदये । उक्तः पौत्राभिषेकेन वक्रगालो महोदये १ इत्थं नीपरीक्षितः ।
कलिनिग्रहादीनि कर्माणि कथयिष्यन् विदुरागमनेन धृतराष्ट्रप्रस्थान ततोऽर्जुनागमं ततः कृष्णा

तेन संभृतसंभारो लब्धकामो युधिष्ठिरः वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिं २९ आहूतो
भगवान्राज्ञा याजयित्वा द्विजैर्नृप उवास कतिचिन्मासान् सुहृदां प्रीतिकाम्यया ३८ ततो रा
ज्ञाभ्यनुज्ञातः कृष्णया सह बन्धुभिः ययौ द्वारवतीं ब्रह्मन् सार्जुनो यदुभिर्वृतः ३० इति श्रीभागव
ते प्रथमस्कन्धे परीक्षिज्जन्मवर्णनं नाम द्वादशोऽध्यायः १२ सूत उवाच विदुरस्तीर्थयात्रायां मै
त्रेयादात्मनो गतिं ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविवित्सितः १ यावतः कृतवान् प्रश्नान्
क्षत्ता कौषारवाग्रतः जातैकभक्तिर्गोविन्दे तेभ्यश्चोपरराम ह २ तं बन्धुमागतं दृष्ट्वा धर्मपुत्रः सा

न्तर्धानं ततः पांडवप्रस्थानं च निरूपयन् \ हानुजः धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ३
निविविशिष्यायैः गतिरिति तयात्मगत्या वाप्तं विवित्सितं ज्ञातुमिष्टं सर्वं येन १ तदेवाह यावतः
केभ्यो भगवतादिविषयान् प्रश्नान् प्रथमं कृतवान् कौषारवस्य मैत्रेयस्य पुरतः पश्चात्त्रिचतुर प्रश्ना
एत्वा न मात्रेण गोविन्दे जातैकभक्तिः तयाकृतार्थः सन् तेभ्यः प्रश्नेभ्यः उपरराम ततः परं न विजि

नदीहयाग्रहव्यापारेणप्रमत्तानामस्याक्रामत् आयुःकालोतिक्रांतः यद्वातानतिक्रामत्वादभिभवदित्यर्थः
१८ अभिप्रेत्यज्ञात्वा नैतत्प्रतीकारःक्रियतां किंनिर्गमनेनेत्यत आह प्रतिक्रियेति सर्वेषामिति येःप्रतिकर्तव्येते
षामपीत्यर्थः १९ कथंधनादिवियोगः सोपुमात्कोतत्याह येनकालेनाभिपन्नमभिग्रस्तः २० यथावस्था

एवंगृहेषुसक्तानांप्रमत्तानांतदीहया। अत्याक्रामदविज्ञातःकालःपरमदुस्तरः १७ विदुरस्तदभि
प्रेत्यधृतराष्ट्रमभाषत राजन्निर्गम्यतांशीघ्रंपश्येदंभयमागतं १८ प्रतिक्रियानयस्येहकुतश्चि
त्कर्हिचित्प्रभोः सएषभगवान्कालःसर्वेषांनःसमागतः १९ येनचैवाभिपन्नोयंप्राणैःप्रियतमै
रपि जनःसद्योवियुज्येतकिमुतान्यैर्धनादिभिः २० पितृभ्रातृसुहृत्पुत्राहतास्तेविगतंवयः
आत्माचजरयाग्रस्तःपरगेहमुपाससे २१ अंधःपुरैवबधिरोमंदप्रज्ञश्चसांप्रतं विशीर्णद
न्तोमंदाग्निःसरागःकफमुद्वहन् २२ अहोमहीयसीजन्तोर्जीविताशायथाभवान् भीमेनाव
र्जितंपिंडमादत्तेगृहपालवत् २३ अग्निर्निसृष्टोदत्तश्चगरोदाराश्चदूषिताः हृतंक्षेत्रंधनंयेषांत
द्दत्तैरसुभिःकियत् २४

नमतिर्निरस्तमिति दर्शयन्वैराग्यमुत्पादयति पितृभ्रात्रेति सप्तभिः आत्मादे
हश्च २१ २२ येनपुत्राहताःतेनभीमेनदत्तंपिंडं गृहपालइव गृहपालःश्वा २३ निसृष्टःप्रदत्तःगा
रोविषंदूषिताप्रमत्ताः नर्देतैस्त्वादिभिः तद्दत्तैरसुभिः कियत्प्रयोजनं नकिंचिदित्यर्थः २४ ॥ ॥

श्री० प्र० टी० ६१

तस्यापि पश्यैवैतद्वमनुभवतोपि परैतितीयते २५ गतस्त्वार्थ्यशोधर्मो दिक्षूवं मुक्तंबंधनःत्यक्ताभि
मानः क्रमगतइति अविज्ञातात्मानिर्यस्तमधीरः प्रामदुःखमस्मत्यैदनेनमुक्तिप्रोमः २६ नेशानमस्तुनतः
प्रागेवकृतप्रतीकारः स्वकान्स्वतपवपरतः परोपदेशोनोवा त्वंतुनेशानमोनाभूः २७ अनइदानीं थी।
रोभवेत्याह यवेति अर्वाक्पूर्वावीनपश्यतस्तूर्योगणानर्थपरस्यादि विकर्षति स्माक्षिनतीतिना।

तस्यापि तवेदेहोयं कृपणस्यनिर्जीविषोः परेत्य निक्कुत्तोजीर्णोजरया वासमीइव २५ गतस्त्वा
र्थोमिमेदैहविरक्तोमुक्तबंधनः अविज्ञातगतिर्जह्यात्सवैधीरउदाहृतः २६ यः स्वकात्परतोवे
हजातनिर्वेदआत्मवान् हृदिकृत्वाहरिं गेहात्प्रव्रजेत्सनरोत्तमः २७ अथोदीचीं दिशं यातुवि
रक्तामतिर्भवान् इतोर्वाक्प्रायशः कालः पुंसां गुणविकर्षणः २८ सूत उ० एवं राजावि
दुरेणानुजेनप्रज्ञाचक्षुर्बोधितोह्याजमीढः छित्वास्वेषुस्नेहपाशान्द्रढिम्नो निश्चक्राम भ्रातृसंद
र्शितात्मा २९ पतिंप्रयांतंसुबलस्यपुत्री पतिव्रताचानुजगामसाध्वी हिमालयं न्यस्तदंडप्रहर्षं

या ३० अजमीढः अजमीढवंशजः प्रज्ञाचक्षुरंधः एवंबोधितः सन् इति द्रढिम्नो वितदान् भ्रातृसंद
र्शितोभ्रात्रावगमितोत्मायोगोयस्य सः २९ सुबलस्यपुत्री गांधारी साध्वी सुशीला हिमालयंप्रयांतंप
तिंजगाम कथंभूता सुकुमारी हिमाद्रिः दुःखबहुलः हिमालयंगतानामाह न्यस्तदंडानांप्रहर्षो यस्मिन् स
दुःखबहुलोपि केषांचिद्धर्षहेतुर्भवति इत्याह न्यस्तेति मनस्विनां शूराणां युद्धेसन्नतीव्रः प्रहारो यथा पा

61A

कृपी द्रोणभार्या जामयो ज्ञातिभार्या अन्याश्च स्त्रियः ४ प्राणं तन्व इति कुतश्चिन्मूर्छादिदोषात् गतोऽपि
त्तेऽसति तन्वः करचरणाद्या निश्चेष्टा भवंति पुनस्तस्मिन्नाविर्भूते सति यथोत्तिष्ठंति तद्वत् ५ विरहेण
यदौत्कंठ्यं तेन कातरा विवशाः ६ तं विदुरं ७ पक्षिणोऽपत्यानि यथा स्नेहेन पक्षच्छायया वर्धय

गांधारी द्रौपदी ब्रह्मन् सुभद्रा चोत्तरा कृपी अन्याश्च जामयः पांडोर्ज्ञातयः ससुताः स्त्रियः ४ प्रत्युज्ज
ग्मुः प्रहर्षेण प्राणं तन्व इवागतं अभिसंगम्य विधिवत्परिष्वंगाभिवादनैः ५ मुमुचुः प्रेमबा
ष्पौघं विरहौत्कंठ्यकातराः राजा तमर्हयांचक्रे कृतासनपरिग्रहं ६ तं भुक्तवंतं विश्रां
तमासीनं सुखमासने प्रश्रयावनतो राजा प्राह तेषां च शृण्वतां ७ युधिष्ठिर उवाच अपि स्मरथ नो युष्म
त्पक्षच्छायासमेधितान् विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः ८ कया वृत्त्या वर्तितं वश्च
रद्भिः क्षितिमंडलं तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ९ भवद्विधा भागवतास्तीर्थभूताः
स्वयं विभो तीर्थीकुर्वंति तीर्थानि स्वांतःस्थेन गदा

ति नः युष्मत्पक्षपातच्छायया समेधितानस्मा
न् किं स्मरथ समेधितत्वमेवाह विपद्गणात् यस्मान्मोचिताः स्म ८ वो युष्माभिः तत्र कया वृत्त्या वर्तितं देहवृ
त्तिः कृता कानि च तीर्थादीनि सेवितानीति ९ भवंतस्तीर्थाटनेन न स्वार्थं किंतु तीर्थानुग्रहार्थमेवेत्याह
भवद्विधेति मलिनजनसंपर्केण तीर्थानि मलिनानि जातानि तानि सतः पुनः स्वयं तीर्थीकुर्वंति स्वांतःस्थेन

भा॰ स्क॰
टी॰
६२
62

अपि किं स्विदमा मासमेते भवद्भिः क्वापि दृष्टाः श्रुता वा ११ १२ यदुकुलतत्त्वार्तानेदेनमाह नत्विति १२ श्रे-
यस्कृतं न त्वमुपदिशति १८ न तु मूढो मोकथमुपदिशति न त्वसौ मूढः किं तु यमस्तद्रूपेणास्मीनवकि।
कारणाय मे वाचा गतेषु त्रकोऽद्रुधरेऽनुपेताद्यामाह अविभ्रद्दीति अविभ्रद्दृतवानित्यर्थः मांऽव्यथा
यात् कृविस्रोतनचुपावतो मजनमदामाद व्यपश्लिमपश्चरतः समीपेनानसंप्राप्य तेनमस्तेनिवद्धा नौ।

अपि नः सुहृदन्मातर्बान्धवाः कृष्णदेवताः दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते ११ इत्या।
कोऽपि मंत्रतत्रेननत्स्वं मम वर्णयत यथानुभूतं क्रमशो विनायदुकुलक्षयं १२ नन्वपियं यदुर्वि-
षं दुतॄणां स्वयमुपस्थितं नावेदयत्सकरुणोऽदुःखितानुदृष्टमसत्तमः १३ कंचित्कालमथावा।
सीनसत्कृतो देववत्सुखं भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् १४ अविभ्रद्दर्यमा दंड
यथावदघकारिषु यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः १५ युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं श्रिया १६
कुलंधरं भ्रातृभिर्लोकपालाभैर्मुमुदे परया।

यतातेनिविद्य नरात्तया सर्वान्नमूलमारोपयामा
सुः ततो माजानमृषिं तत्वान्मूलादवतार्य प्रसादयामास ततो मुनिर्यमं गत्वा कुपितउवाच कस्माद्दं
शूलमारोपितरहति तेनोक्तं त्वं बाल्ये शलभं कुशाग्रेण विध्यन् क्रीडितवानिति न खलु त्वा मांऽव्यासशपा।
प बाल्येः त्वावत्तोमे महान्तं दंडयतः त्वं कालित्वानं शूद्रो भवेति अतएव तावत्कालमर्यमा सूर्योदंडया
ततः

१२५ इदानीं राज्ञा एवं वंशे निरूपयितुमुत्कर्षं निगमयति यु-
धिष्ठिर इति कुलंधरे १६ ॥

सौबलीं सुबलस्य पुत्रीं गांधारीं चेति १
गंगायां चापतत् पांडौ उपरते मृते २

कृतं मैत्रं मित्रे देवनं यं संध्यावंदने येन नत्वा संपूज्य पितरौ विदुरधृतराष्ट्रौ ३१ हे गावल्गणे गवल्गणस्य पुत्र संजय ३२ अकृतप्रज्ञे मय्यस्मतो शमलमपराधमाशंसमानः आशंकमानो भार्यया सह ३३ यावत् तातो हतः स्यात् तत्र क्व गतो ३४ कृपया स्नेहवैक्लव्यात् अतिपीडितः आत्मेश्वरं धृतराष्ट्रमपश्यन् विरहात्

अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोभूमिरुक्मैः गृहं प्रविष्टो गुरुवंदनाय न चापश्यत् पितरौ सौबलीं च ३२ तत्र संजयमासीनं पप्रच्छोद्विग्नमानसः गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः अंबा च हतपुत्रार्त्ता पितृव्यः क्व गतः सुहृत् ३२ अपि मय्यकृतप्रज्ञे हतबंधुः स भार्यया आशंसमानः शमलं गंगायां दुःखितोऽपतत् ३३ पितर्युपरते पांडौ सर्वान्नः सुहृदः शिशून् अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ३४ सूत उवाच कृपया स्नेहवैक्लव्यात् सूतो विरहकर्शितः आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ३५ विमृज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ३६ संजय उवाच नाहं वेद व्यवसितं पित्रोर्वः कुलनंदन गांधार्या वा महाबाहो मुषितोऽस्मि महात्मभिः ३७

कर्शितश्च सूतः संजयो न प्रत्युत्तरमाह ३५ आत्मना बुद्ध्या आत्मानं मनो विष्टभ्य धैर्ययुक्तं कृत्वा प्रभोः धृतराष्ट्रस्य गांधार्याश्च ३६ व्यवसितं निश्चयं यतो मुषितो वंचितोऽस्मि ३७ ॥ ॥

भा.प्र.
टी.
६३

63

एवंविलपति तस्मिन् अथ नारदस्तत्राजगाम अञ्जलिकृचिस्तु स्तके पादान्तरेन दुःखे त्वयथा संप्रश
एवमाख्यायते शोकवेगाद्धर्यव्यपत्तिवार नन्तुराजाभ्यर्चयत कुतः शोकाक्रान्तः त्वयाविष्टः श्रद्धयार
हितः पुमान् गुरुदेवद्विजातीनां शुश्रूषणेन न समाचरेदिति स्मृतेः पादान्तरे चलिख्यते नैव एतस्मिन्नेतरवि
प्रनारदः प्रत्युदयत वीणां वितत्वीरत्नायनभगवान्स्तेरत्नवकः राजादत्तोपनीतार्घ्यप्रत्युत्थायाभिवं
स्ततः अथाजगाम भगवान्नारदः सदन्नेवकः प्रत्युत्थायाभिवाद्यार्हसा तत्रजोभ्यर्चयन्मुनिं ३२
युधिष्ठिर उवाच नाहं वेद गतिं पित्रोर्भगवन्क्व गतावितः अम्बा वा हत पुत्रार्ता क्व गता च तपस्वि
नी ३३ कर्णधार इवापारे भगवान्पारदर्शकः अथाबभाषे नृपतिं नारदो मुनिसत्तमः ३४ नारद
उ. मा कंचन शुचो राजन् यदीश्वरवशं जगत् लोकाः सपाला यस्येमे वहन्ति बलिमीशितुः सस
युनक्ति भूतानि स एव वियुनक्ति च यथा गावो नसि प्रोतास्तन्त्यां बद्धाश्च दामभिः वाक्तन्त्यां नामभि
र्बद्धा वहन्ति ब
हिते परमासनमासीनेपोरवैरेतेभ्यभाषतेति ३९ नाहंवेद जानामि नयास्विनीड्यःत्व
युता ३३ अयारेशोकसागरे भगवांस्त्वमेवपारदर्शकः अतो ब्रूहीति शेषः ३४ आशवेनयथा हृतकथने
नशोकेन मूर्छितः पतेदिति प्रथमं तावच्छोकमुपशमयति कंचन मा शुचः मा शोच नकेवलं तावे
व परमात्माधीनं जगत् ३८ तदेवाह लोका इति युनक्ति संयोजयति वियुनक्ति वियोजयति च
३८ यथा गावो वलीवर्दाः नस्यां दीर्घरज्ज्वां बद्धाः स्वदामभिः नसि नासिकायां प्रोताः स्वामिनो बलिं वहन्ति

प्रत्यूतौ पारतंत्र्यमुक्त्वा संयोगवियोगयोरप्याह यथेति सं२

२२

प्रवृत्तो पारलेश्च मुक्तासंयोगवियोगयोरप्याह यथेति क्रीडोपस्कराणां क्रीडासाधनानां ४३ ईश्वराधीन-
त्वात्तन्न शोकः कार्य इत्युक्तं लोकतत्त्वे च विचार्यमाणे निर्विषयो यतः शोक इत्याह यद्यपि लोकं जनं जीव-
रूपेणाध्रुवं नचेति नध्रुवं नाप्यध्रुवं शुद्धब्रह्मस्वरूपेणानिर्वचनीयत्वेन चोभयं वा विजानासि सर्वथा-
पि तेषु न ते पितृव्याद्यो नशोच्याः स्नेहादन्यत्र स्नेह एव केवलं शोकहेतुः सचाज्ञानमूल इत्यर्थः ४४
तस्मान्मां विना कथं ते वर्तेरन्निति मनसो वैक्लव्यं व्याकुलत्वं त्यज ४५ नतु त्वद्देहतः तेषां वृत्तिरित्येतन्नाव।

यथा क्रीडोपस्कराणां संयोगविगमाविह इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां ४३ यन्मन्य-
से ध्रुवं लोकमध्रुवं वा न चोभयं सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात ४४ तस्माज्जह्यङ्ग वैक्ल-
व्यमज्ञानकृतमात्मनः कथं त्वनाथाः कृपणा वर्तेरंस्त्वत्समाश्रिताः ४५ कालकर्मगुणाधीनो देहोयं
पाञ्चभौतिकः कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथापरं ४६ अहस्तानि सहस्तानामपदानि चतुष्प-
दां फल्गूनि तत्र महतां जीवो जीवस्य जीवनं ४७ तदिदं भगवान्राजन्नेक आत्मात्मनां स्वदृक्

वासीत्याह कालो गुणक्षोभकः कर्म जन्मनिमित्तं गुणा उपादानं तदधीनः पाञ्चभौतिको देहः तद्विभागेना-
शनात् यथा सर्पग्रस्तो जगरकिलिलोन्यं रक्षति तद्वत ४६ ईश्वरेणाविहिता वृत्तिः सर्वतः सुलभैवेत्याह
अहस्तानि पश्वादीनि अपदानि तृणादीनि तत्र तेषु हस्तादिमत्स्वपि फल्गूनि अल्पानि एवं जीवः सर्वोपि
सर्वस्य जीवनं जीविका ४७ एतेनैव च सर्वतो मृत्युग्रस्तत्वमुक्तं मोहनिवृत्त्यर्थं च देहतत्स्वावलत्वमाह त

भा॰प्र॰
टी॰
६४

64

ननु सजातीयविजातीयभेदशून्ये कुलपतनं तत्राह आत्मनां भोक्तृणामात्मा स्वरूपमतो न सजातीयभेदः
भूतैर्योनेन तत्र स्थानैर्विरहितं भोक्तृभोग्यरूपश्च भाति त्वतो न विजातीयभेदोऽपि नन्वेकः कथमनया प्रतीय
ते अत आह मायया नैवरूपया पश्यति ४८ कामावलीह शोभमहामायावीदारकायामित्याह सोऽयमिति
असुराणामभावाय नाशाय ४९ तर्हि कस्मादुदासीनतैव वा सा सामाकृष्या इत्याह तत्र देवानां कार्यं तेन
भूतानां नन्तरो भासि परयन्तं मायया योगरूपया ४९ सोऽयमद्य महाराज भगवान् भूतभावनः कालरूपो
ऽवतीर्णोऽस्यामभावाय सुरद्विषां ५० निष्पादितं देवकृत्यमवशेषं प्रतीक्षते तावद्यूयमवेक्षध्वं
भवेद्यावदिहेश्वरः ५१ धृतराष्ट्रः सह भ्रात्रा गान्धार्या च स्वभार्यया दक्षिणेन हिमवत ऋषीणाम्
आश्रमं गतः ५२ स्रोतोभिः सप्तभिर्या वै स्वर्धुनी सप्तधा व्यधात् सप्तानां प्रीतये नाना सप्तस्रोतः प्र
चक्षते ५३ स्नात्वानुसवनं तस्मिन् हुत्वा चाग्नीन् यथाविधिः अब्भक्ष उपशान्तात्मा स आस्ते विगतै
निष्पादितं केवलमवशेषं प्रतीक्षते यदुकुलक्षयमिति ह दिष्ट्यन्तो निजं धाम यास्यतीति अतो यूयम
पि गच्छतेत्यर्थः ततस्त्वदभ्रान्तमपि विदुरस्तदेव वनेवोक्तः ५१ तदेव शोकवाक्येन च निवार्य जिज्ञासेव तेषां यया
वृत्तेः कथयति धृतराष्ट्र इति हिमवतो दक्षिणभागे ५२ या वै सप्तसिद्धा स्वर्धुनी सा आत्मानं सप्तधा व्य
धात् किमर्थं नानाऋषिकुलसप्तभिः स्रोतोभिः सप्तप्रवाहैः सप्तर्षीणां प्रीतये यत एव तत्तीर्थं सप्तस्रोतो वदन्ति
५३ तत्र तेन कृतमश्चगायोगमाह स्नात्वेति चतुर्भिः तत्र स्नानहोमः अब्भक्षः एण च नियमा उक्ताः अतः स्थानेत्र

भविष्यद्वृत्तिर्देशः कुरुवान् ४

६६

64A

जितासन इत्यादिनासनप्राणायामप्रत्याहारा उक्ताः हरिभावनयेति धारणोक्ता खमला रजःसत्वतमोरूपा
मलायस्येति फलतो ध्यानमुक्तं ५५ समाधिमाह द्वाभ्यां आत्मानं मनोहंकारादिस्थूलदेहाद्विया
ज्य विज्ञानात्मनि बुद्धौ संयोज्य एकीकृत्य तं विज्ञानात्मानं क्षेत्रज्ञं आत्माद्वियोज्य तेजस्तेऽहंकारे प्रविलाप्य तेन च
तेजस्तं शुद्धात्मादियोज्य आधारे ब्रह्मणि संतं ब्रह्मणि प्रविलाप्य घटोपाधेर्वियोज्य यथा महाकाशे प्र

जितासनो जितश्वासः प्रत्याहृत्य षडिन्द्रियः हरिभावनया खमलं रजःसत्वतमोमलः ५५ विज्ञा
नात्मनि संयोज्य तेजस्तत्प्रविलापयेत ब्रह्मण्यात्मानमाधारे घटाकाशमिवाम्बरे ५६ खस्वमाया
गुणो देहो निरुद्धकरणाशयः निवर्तिताखिलाहारस्त्वास्ते स्थाणुरिवाध्वना ५७ तस्यान्तरा
योगमेवाप्नुः सम्यक् समाविलकर्मणा सर्वात्मप्रयतनाद्वाजनन्नपरतः पश्चमेदनि कलेवरं जहातीत्य
न च भस्मीभविष्यति ५८

विलापयेतेन ईन ५६ श्रुत्यानाभावमाह खमलेति अनेन गुणत्वोभाद्यद्धिरि
इपविवेकाद्वा युक्त्यानेभवेत नतु अभयेनत्यस्यनास्ति येनो खमलो मायागुणानामहंकारे उतरफलं वासना।
यस्य स निरुद्धानि करणानि चक्षुरादीनि आशयो मनश्च यस्य सः अनन्य एव निवर्तितः सर्व विलासः आहारः भो
ग्यमिन्द्रियैर्विषयाहरणं वा येन सः अपरस्याणोरिव निश्चलस्यास्ते ५७ तया भूतमध्यानेन तमुद्यतमाह न
मेति अनेनायो विज्ञो मैवाभूतिन्यजामामः स्वादमः ५८ दर्शनमपि तावन्न कुर्यामित्युदितेन प्रत्याह सर्वात्मत

तर्हि गांधार्यानयनार्थं गमिष्यामीत्याह पत्युरिति हे महोटजे पर्णशालायां महिते योगाग्निना सहस्रारं पत्याद्वि
भिर्दह्यमाने तस्य पत्नी बहिः स्थिता सती तं पतिमनु अग्निं वेक्ष्यति प्रविश्यति ५८ तर्हि विदुरानयनार्थं गं
तव्येनेत्याह विदुरस्तु तन्निशम्य दृष्ट्वा भ्रातुः स्वगत्या हर्षः तन्मृत्युना शोकस्ताभ्यां युक्तः तस्मात्स्थानात्ती

दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे बहिः स्थिता पतिं साध्वी तमग्निमनु वेक्ष्यति ५८ विदुरस्तु
तदाश्चर्यं निशाम्य कुरुनन्दन हर्षशोकयुतस्तस्माद्गन्ता तीर्थनिषेवकः ५९ इत्युक्त्वाथारुहत्
स्वर्गं नारदः सहतुम्बुरुः युधिष्ठिरो वचस्तस्य हृदि कृत्वाजहाच्छुचः ६० इति श्रीभागवते प्रथम
स्कन्धे धृतराष्ट्रनिर्याणं नाम त्रयोदशोऽध्यायः १३ सूत उवाच संप्रस्थिते द्वारकायां जिष्णौ बं
धुदिदृक्षया ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं १ व्यतीताः कतिचिन्मासास्तदा ना
यात्ततोऽर्जुनः ददर्श घोररूपाणि निमित्तानि कुरूद्वहः २

र्थं निमेषं विलम्बं न तावत् गमिष्यति ५९ शुचः शोकान् ६० इति भावार्थे प्रथमस्कन्धे त्रयोदशोऽध्यायः १३
चतुर्दशे त्वरिष्टानि दृष्ट्वा राजा विशंकितः अर्जुनागमनात्कृष्णनिरोधानमितीर्यते १ श्रीकृष्णस्य
वेति च कारेण अभिप्रायवद्गतान् १ कतिचित्समयस्य कालातिक्रमेऽपि ततो द्वारकातो यान्नायात्तस्मि
न्दुर्यातः निमित्तानि उत्पातान् कुरूद्वहः युधिष्ठिरः २ ॥ ०

मास्त २

65A

तेन १   पित्रादीनां स्वप्रतियोगिभिः

रौद्रां घोरां तद्देवाह विपर्यस्तास्तु धर्मा यस्मिंस्तस्य वार्त्ता जीविका क्रोधलोभान्वितैर्युक्ता आत्मा येषां ३
निःश्रेयसं कपटवद्व्यवहर्तव्यव्यवहारं शाठ्यं वचनेन मिश्रं सौहृदं सख्यं कल्केन कलहाद्यपि ४ अन्यानि
शान्तता सुभानि दृष्ट्वा नृणां लोभाद्धर्मप्रकृतिं च अनुजं भीम ५ वेत्ति वित्तैकैः तस्माद्धेतोर्नायाति।

कालस्य तु गतिं रौद्रां विपर्यस्तं तु धर्मिणः पापीयसीं नृणां वार्त्तां क्रोधलोभान्वितात्मनां ३ निःश्रे
यसं व्यवहर्तुं शाठ्यमिश्रं च सौहृदं पितृमातृसुहृद्भ्रातृदम्पतीनां च कल्कने ४ निमित्तान्यरि
ष्टानि कालेन त्वनुगतेन नृणां लोभाद्धर्मप्रकृतिं दृष्ट्वा वा वानुजं नृपः ५ युधिष्ठिरं वा च संप्रे
षितो द्वारकायां जिष्णुः सर्वं सुहृद्दिदृक्षया ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं ६ गताः सप्त तु
मासा भीमसेन तवानुजः नायाति कस्य वा हेतोर्नाहं वेदेदमञ्जसा ७ अपि देवर्षिणादिष्टः।
स कालोऽयमुपस्थितः यदात्मनोऽङ्गमाक्रीडं भगवानुत्सिसृक्षति ८ यस्मान्नः संपदो राज्यं दाराः प्राणा
तिश्रद्दं न वेद्मि ७ अपि किं यदात्म \   णाः कुलं प्रजाः आसन्सपत्नविजयो लोकाश्च यदनुग्रहात्
नः आक्रीडं क्रीडासाधनं शरीरं मनुष्यनाट्यमुत्स्रष्टुमिच्छति स कालः प्राप्तः ८ अस्माकं सर्वप्रकाराणां
तद्धेतुः कृष्णः अतस्तद्वियोगं विनास्माकमरिष्टं न स्यादित्याशयेनाह यस्माद्धीकृष्णाद्धेतोः न इत्येव
विधार्दनं नः सर्वं करिष्यति लोकाश्च यत्कारणान्नृपाः यस्मात्तदनुग्रहात् ९ ॥

भा॰प्र॰
टी॰
६६

हृतात्मविरिंतं नयुस्माकमारोमतः १ उत्पातानेंद्देहिकानाह वामाउर्वादयः स्फुरंति वेपथुःकंपश्च हृदयेवर्तते पतेमह्यमारात्मविरिंतमपरदाम्यति २ भौमानाह सौधेस्त्विभिः शिवाक्रोशीसादित्यमभिमैति उच्चस्तुरोमुविक्रोशति मुनलाननाग्निमुवेनवमंतो मगाहभीम मामभिलुत्यसारमेयः। श्वाभिरोतिस्तन यथाभवतिस्तमिरुवन्‌ निःशंकं ३ शालागवादयोमांसव्यवामकुर्वंति मुपस्करं

पश्चोत्पातानाचष्टव्याचष्टेदिव्यांभौमांश्चदैहिकान्‌ घोरमारोमतो हृत्ाउद्‌यनोत्तुहिमोरकृने १ उर्वंत
वाहवोमह्यस्फुरंत्यगपुनःपुनः वेपथुश्चापिहृदयेआरादाशंसंतिविप्रियं २ शिवेषोद्यंनमा
दित्यमभिरौत्यनलाननाः मामंगमारमेयोयमभिरौदित्यभीरुवन्‌ ३ शालाःकुर्वंतिमांसव्यं
हृत्तिणपश्चावोपरे वाहाश्चपुरुषव्याघ्रलक्षयेरुदतोमम ४ मृत्युदूतःकपोतोयमुलूकः
कंपयन्मनः प्रत्युलूकश्चकुह्वानैरनिद्रेशून्यमिच्छतः ५ धूम्रादिशःपरिधयःकंपतेभूःसा
हाद्रिभिः निर्घातश्चमहानासीत्साकंचस्तनयित्नुभिः वायुर्वातिखरस्पर्शोरजसाविसृजंस्तमः

भाद्वयोदक्षिणां कुर्वंति वाहानश्रूव्यानूरुदतः १२ कपोतोयंमृत्युदूतःमृत्युसूचकः उलूकोघूकः प्रत्युलूकः तत्प्रतिपक्षिपितावृकः काकोवा कुह्वानैः कुत्सितशब्दैः विश्वं शून्यमिच्छतः धूम्राःधूसराःदिशः परिधयश्चाग्निभिमालोकामाहृतंवंति १४ दिव्यानाह साद्रिहाभ्यां निर्घातोनिरभ्रवज्रपातःस्त

मरुत्‌ निरोद्दिते
पितृवः

६६

66A

अमुखं ग्रहमर्दं युद्धं १६ भूतानामनुचराणां तेषां गणैः संकुलैर्व्याप्तैः प्राणिभिः सहितैः रोदसी द्यावा।
पृथिव्यौ ज्वलिते इव सरइव पश्येति पुनर्भौमानाह नद्य इति सांद्रैस्त्रिभिः प्राणिनां मनांसि च १७ दुह्यते दु
तिवक्तव्ये दुह्यतीति कर्म कर्तरि प्रयोगः न प्रस्रवतीत्यर्थः १८ देवतानि प्रतिमाः १९ अघं दुःखं २० एतैः

अमृग्वर्षंति जलदा बीभत्समिव सर्वतः सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि १६ ससंकुलैर्भू
तगणैर्ज्वलिते इव रोदसी नद्यो नदाश्च क्षुभिताः सरांसि च मनांसि च १७ न ज्वलत्यग्निराज्येन।
कालोयं किं विधास्यति न पिबंति स्तनं वत्सा न दुह्यंति च मातरः १८ रुदंत्यश्रुमुखा गावो न हृ
ष्यंत्यृषभा व्रजे देवतानि रुदंतीव स्विद्यंति ह्युच्चलंति च १९ इमे जनपदा ग्रामाः पुरोद्यानाक
राश्रमाः भ्रष्टश्रियो निरानंदाः किमघं दर्शयंति नः २० मन्ये एतैर्महोत्पातैर्नूनं भगवतः पदैः
अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा २१ इति चिंतयतस्तस्य दृष्टारिष्टेन चेतसा राज्ञः प्रत्यागमद्
ब्रह्मन् यदुपुर्याः कपिध्वजः २२ तं पादयोर्निपतितमयथापूर्वमातुरं अधोवदनमब्बिंदून् सृजंतं नयनाब्जयोः २३

हत्वा न विद्यते अन्यपुरुषेषु श्रीर्वज्रांकुशादिशोभा येषां तैर्भगवतः पादैर्हीनाम्
रित्यर्थः मन्ये २१ तस्य राज्ञः दृष्टमरिष्टं येन तेन चेतसा चिंतयतः सतः २२ अयथापूर्वं पादयोर्निप
तितं तदेवाह आतुरमित्यादि अधोवदनं नयनाभ्यामब्बिंदून् सृजंतमित्यर्थः २३ ॥

उद्विग्नं केपि हृदयं यस्य विच्छायं विगतकांति २४ स्वजना बांधवाः २५ किं वस्वस्तीति शंकया ख्यापयदित
न कुशलं पृच्छति शूर इत्यादिना मारिषो मान्यो मातामहः आनकदुंदुभिः वसुदेवः २६ स्वसारः पत्न्य
ऽवसुदेवस्य ते मे मातुलानामपि ते मे पृष्टुमेव तथापि पृथगपि पृच्छति स्वयमिति २७ आहुक उग्रसेनः अ

विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितं २४ युधिष्ठि
र उवाच कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते मधुभोजदशार्हार्हाः सात्वतान्धकवृष्णयः
२५ शूरो मातामहः कच्चित्स्वस्त्यास्ते वाथ मारिषः मातुलः सानुजः कच्चित्कुशल्यानकदुंदु
भिः २६ सप्त स्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजः आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयं
कच्चिद्राजाहुको जीवत्यसत्पुत्रोस्य चानुजः हृदीकः ससुतोऽक्रूरो जयंतगदसारणाः २८ आसते
कुशलं कच्चिद्ये च शत्रुजिदादयः कच्चिदास्ते सुखं रामो भगवान्सात्वतां पतिः २९ प्रद्युम्नः सर्व
वृष्णीनां सुखमास्ते महारथः गंभीररयोऽनिरुद्धो वर्द्धते भगवानुत ३० सुषेणश्चारुदेष्णश्च सांबो
जांबवतीसुतः अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः ३१ तथैवानुचराः शौरेः श्रुतदेवोद्धवाद
यः सुनंदनंदशीर्षण्या

असत्पुत्रो यस्मात्स एव जीवन्मात्रमेव पृष्टं अनुजो देवकश्च हृदीकस्तत्सुतः कृतव
र्माजयंतादयः कृष्णभ्रातरः २८ सर्ववृष्णीनां मध्ये महारथः गंभीररयो युद्धे महावेगो वर्द्धते मोदत इत्यर्थः

67A

नि रूपो २

१२ भगवतिस्वखमासेरितिप्रश्नस्यानोविन्यमाशंक्याह पुरइति २४ भगवतोग्रावस्थानेहिलोकान्नामेग।
लेनानायेनायायेनाहस्तनुर्भिः मंगलायप्रभाय हेमायलक्ष्यपालनाय भवायोद्भवाय अनंतसाक्षः व
लभद्रसहायः २७ अर्चिताःसर्वपूजिताः परमानंदप्रद्याभवति महापौरुषिकावैकुंठनाथानुचराः
अपिस्वल्पामतेसर्वेषामकृतस्वभुजाश्रयाः अपिस्मरेतिकुशलमस्माकंवद्धसौहृदाः २२ भगव।
नपिगोविंदप्रसन्नोभक्तवत्सलः क्वचित्सुरेषुधर्मायास्वखमालेसुहृज्जनः २४ मंगलाय।
चलोकानांहेमायचवभवायच आलेयउकुलाभोधावाग्नोनंतसारवः प्रमान् २५ यद्वाङ्गदंडैर्गु।
मायामत्पुर्यायदुवीर्विताः क्रीडंतिपरमानंदमहापौरुषिकाइव २५ यत्पादपुरुषाणांमुख्या।
कर्मणामत्यादयोनुष्टसहस्रयोषिताः निर्जित्यसंख्येत्रिदशानस्वाशिषोहरतिवज्रायुधवल्ल
भोचिताः २६ यद्वाहुदंडाभ्युदयानुजीविनोयदुप्रवीराह्यकुतोभयामुहुः अधिक्रमंत्यंघ्रिभिरा
हृतावलात्सभासुधर्मांसुरसत्तमोचिता २७ ॥
यस्यपादपुरुषाणांमेवमुख्यैनपत्न्यादिभिः श्रेष्ठयत्कर्म तेनसत्यभामादयःसंख्येषुदेशीकृष्णस्यवलेननि।
र्जित्यत्रिदशाशिषोदेवतायभोग्यान्पारिजातादीन् वज्रायुधस्यवल्लभाशचीनस्याउचिताःउचितान् २८
यदुजनदउप्रभावोपजीविनः सुधर्मामघ्रिभिरधिकामंति सभोविदःस्वखमासेरितिपंचमश्लोकेन।

१८

इदानींतस्यैवकुशलंपृच्छति कच्चिदितिषड्भिः अनामयमनामयं नलब्धोमानोयेनवैयुष्मभ्यःसकाशात्
न किंवातैःप्रत्युतावज्ञातःतिरस्कृतः यतश्चिरोषितः बहुकालंतत्रस्थितः ३८ अभावैरितित्रिभिः प्र
मत्पूर्वैःअमंगलैःपुरुषैःशब्दादिभिर्नाभिहतोनताडितोसिकिं यद्दार्थिनोऽर्थिभ्यःकिमपिनदास्यामी
तिनोक्तं किंयद्वा आशयायामइत्ययाशाभवतितयादास्यामीतिप्रतिश्रुतंतन्नदत्तंकिं कुतोविगानस्का

कच्चित्तेनामयंतातभ्रष्टतेजाविभासिमे अलब्धमानोवज्ञातः किंवानातचिरोषितः ३८ क
च्चिन्नाभिहतोभावैःशब्दादिभिरमंगलैः नदत्तमुक्तमर्थिभ्यआशयायत्प्रतिश्रुतं ३९ कच्चित्त्वं
ब्राह्मणंबालंगांवृद्धंरोगिणंस्त्रियं शरणोपसृतंसत्वंनात्याक्षीःशरणप्रदः ४० कच्चित्त्वंना
गमोगम्यांगम्यांवासत्कृतांस्त्रियं पराजितोवाथभवान्नोत्तमैर्नासमैःपथि ४१ अपिस्वि
त्पर्यभुंक्थास्त्वंसंभोज्यान्वृद्धबालकान् जुगुप्सितंकर्मकिंचित्कृतवान्नयदक्षमं ४२

तिरश्चि ३९ अन्यद्ब्राह्मणादीनांसत्वंप्राणिमात्रंचनत्यक्तवानसिकिंयतः त्वंपूर्वंशरणप्रदआश्रयप
दः ४० अगम्यामितिद्वाभ्यां विहितांस्त्रियमगमः किंगतवानसि असत्कृतामलिनवस्त्रादिकांनागमः
किं नोत्तमैः अत्युत्तमैःसमैरित्यर्थः असमैरधमैर्वा किंनपराजितोसीत्यर्थः ४१ संभोज्यान्भो
जनार्हान्वृद्धान्बालकांश्च किंस्वित्पर्यभुक्थाःपरित्यज्यभुक्तवानसि अक्षमंकर्तुमयोग्यंयत्तत्कि

नित्यमदाप्रेष्ठतमेन हृदयेनात्मसंयोगेन बन्धुना श्रीकृष्णेन रहितः शून्योस्मीति आत्मानं मन्यसे इत्यर्थः अन्यथा।
नैककमनःपीडनवदेदित्यर्थः ४३ इति भागवते प्रथमस्कंधे चतुर्दशः १४ कलिप्रवेशमालक्ष्य धुरं न्यस्य
परीक्षिति ध्यास्यतो ह्यनृपः स्वर्गमिति पंचदशोब्रवीत् १ कृष्णोर्जुनभ्रात्रा विकल्पितः इतिच्छेदः नानाशंकास्पदं
रूपमालक्ष्य विकल्पित इत्यर्थः प्रतिभाषितुं नाशक्नोदित्युत्तरेणान्वयः कृष्णविश्लेषेण कर्षितः कृशः कृ

कच्चित्प्रेष्ठतमेनाथ हृदयेनात्मबन्धुना शून्योस्मि रहितो नित्यं मन्यसे तेन्यथा न रुक् ४३ इति प्रथ
मे प्रथमे नाम चतुर्दशः १४ सूत उ० एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः नानाशंकास्पदं
रूपं कृष्णविश्लेषकर्षितः १ शोकेन शुष्यद्वदनहृत्सरोजो हतप्रभः विभुं तमेवानुस्मरन् नाशक्नोत्प्र
तिभाषितुं २ कृच्छ्रेण संस्तभ्य शुचः पाणिनामृज्य नेत्रयोः परोक्षेण समुन्नद्धप्रणयौत्कण्ठ्यकात
रः ३ सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन् नृपमग्रजमित्याह बाष्पगद्गदया गिरा ४ अर्जुन
उवाच वंचितोहं महाराज हरिणा बंधुरूपिणा येन मेपहृतं तेजो देवविस्मापनं महत् ५

तः १ शोकेन हेतुना वदनं च हृच्च ते एव सरोजे शुष्यती वदनहृत्सरोजे यस्य हतप्रभास्तेजोयस्य सः २ शु
चः शोकाश्रूणि यान्युद्भूतानि नेत्रयोरेव संस्तभ्य गलितानि च पाणिना मृज्य परोक्षेणादर्शनागो
चरेण श्रीकृष्णेन हेतुना समुन्नद्धमधिकं यत्प्रेमौत्कंठ्यं तेन कातरः व्याकुलो नृपमाहेत्युत्तरेणान्वयः ३ स
ख्यं हितैषिता मैत्रीमुपकारिता सौहृदं स्नेहवत्ता च बाष्पेण कण्ठावरोधाद्गद्गदया ४ येन मा वंचयता दे

भा. प्र.
टी.
६९
64

जि ७ ले १

यस्य त्वया वियोगेनेत्यादिषु छन्दांसीति नारद मघ मुषितरतिसमस्तशोकस्येन तछन्देनान्वयः प्रियस्यापि
यत्वेदर्शनातः उक्तेन प्राणेषु पितृपादिः १ स्त्रीकृत्येसापकाशानन्तुस्मरतिदृशाभिः यत्संश्रयादिति यस्यमे।
कृष्णाद्हृतान्सेणाकामेन उन्मदासाम्यतिमतानातेनः प्रभावोहृते यत्तु शरदत्तैव पश्चानहन्तुःसज्जीकृते
च तेन मत्स्येयत्रोपरीभ्रमति त्वितुल्लतस्तान उन्मदान विनयद्रोपदीप्राप्ताच २ उड्डतिविस्मयेयस्मत्त्वियोप
यस्य त्वया वियोगेनलोकोऽयमप्रियदर्शनः उक्तेन रहितो ह्येष मृतकः प्रोच्यते यथा १ यत्संश्र।
याद्द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां तेजो हृतं खलु मयाभिहतश्च मत्स्यः सज्जी ग
कृतेन धनुषाधिगता च कृष्णा २ यत्संनिधावहमु खाण्डवमग्नयेऽदामिन्द्रं च सामरगणं तरसा विजित्य व
लब्धा सभा मयकृताद्भुतशिल्पमाया दिग्भ्योऽहरन्नृपतयो बलिमध्वरे ते ३ यत्तेजसा नृपशिरो
ऽङ्घ्रिमहन्मखार्थमार्योऽनुजस्तव गजायुतसत्त्ववीर्यः। तेनाहृताः प्रमथनाथमखाय भूपा यन्मो।
त्वताहेतोःउवमिःसत्वंनग्रग्रयेग्रहादनवानस्मि तोऽस्व। विनास्तदनयन्बलिमध्वरेते ४
तादेवहितेनमयेन कृता च सभालब्धा अद्भुता शिल्परूपा माया यस्यां सा तेऽध्वरे यागे राजसूये २
मर्वेनतरश्लोकोविगीन सत्यार्थ्यायते नृपशिरःसुप्रग्रीवियस्यतजरासंध तदाऽनुजो भीमो मखार्थं तेन
हतेहतवान् नत्रिजंयविनाराजसूये सखानुपपत्तेः गजायुतसत्त्वसत्त्व मुत्साहशक्तिः वीर्यं च बलं।
चयस्यसः नेहत्वा प्रमथनाथोमहाभैरवस्तस्य मखाय येराजानस्तेनाहृतास्ते यत्तस्मान्मोचिताःतत

६९

69A

यैः कितवैः दुःशासनादिभिः तत्र पत्न्याः कचं विकीर्य उन्मुच्य स्पृष्टं तेषां स्त्रियो हतेशाः । अत एव वैधव्यान्मुक्तके
शाश्चाकृतवत्कार । कथं भूतं कचं । अपि मुखे राजसूयमधिकृत्य तत्र मोरचितो यो महाभिषेकस्तेन शाश्वत
ं चारुतमं । यत्त्वरायणदानीमेव श्रमस्य श्रीकृष्णस्य नमनो मार्द्यो: पतितास्त्रीणां मुखे यायस्याः पत्न्या
स्तयि नाथे सति चेन्मे दुःखेन हिं कोऽपराधः स त्वं ममैवाभाग्यमित्यभिप्रायः । यद्वा हे शोपे तस्याः पिपतिता

ततत्वात

पादयाः समये नमस्मनो निःसीये १ शिष्याणामपुनस्य येन तं कोऽभुंक्तेस्य । तस्माद् दुर्वाससो हेतु । पृथिा
दुर्योधनेन रचितं यद्दुरन्तकृच्छ्रे शापलक्षणं । तस्मात्त्वकाशात्तस्मात्त्वनेमत्यजुगोप । किंकृत्वा शाकमेवा

पत्न्याः स्नवाधिमस्त्वरूममहाभिषेकाविष्टचारुकचं रकितवैः सभायां । स्पृष्टं विकीर्य पदयोः
पतितास्त्रमुख्या ये तस्त्रियो कृतदतेशा विमुक्तकेशाः १ यो नो जुगोप वनमेत्य दुरन्तकृच्छ्रा =
दुर्वाससोऽरिविहितादयुनाग्रभुः । ६

यं तास्मिन्यात्रैव शिष्टमुपभुज्य जगत्त्वा । यत उपभोगात्सलिलेविति
मग्नो मुनीनां सख्यः त्रिलोकीतृप्तमाश्रमेस्मिन् । एवं हि महाभारते कथा । कदाचिद्दुर्योधनेन दुर्वाससमतिथ्ये
कृते न तेन च परितुष्टेन वरं वृणीष्वेत्युक्ते । दुर्वाससः शापान्यो दुर्वानशेपुरितिमनसि निधाय दुर्योधनेनोक्तं
युधिष्ठिरो सत्कुलमुख्यः तस्यापि भवतैवमेव शिष्यापुतसहितेनातिथिना भवितव्यं । किंतु द्रौपद्या
यावत्तथा नावसीदेत । तथा तस्यां भुक्तवत्यां तद्दुरन्तं । ततश्च तथैव दुर्वासा मसिष्याः मेप स्मादरोणायुधि ।

भा॰प्र॰
सि॰
७
70

छिरेणमाध्याह्निकं कृत्वाग्रागमय्यतामिति विज्ञापितो मुनिसंध्योपमर्षणाय जले निमग्नः तत्र चिन्तातुर
पाञ्चोपग्रास्ततमोऽवः श्रीकृष्णः तत्क्षणमेव भक्तवात्सल्यतया चागतः तया वेदिते वृत्तान्ते भगवतोक्तं
श्रीपत्रं देव च तुभ्यं तृप्तितोऽस्मि प्रथमं मां भोजय तया चातिलज्जया उक्तं स्वामिन्नमद्भोजनपर्यन्तमतत्पात्रम
ध्यं न्यस्य पटे न स्थाल्या मया च सर्वान् संभोज्य भुक्तमतो नास्त्यन्नमिति तया पतिनिर्बन्धेन स्थालीमा
नीय तत्र दलपत्रं किंचिच्छाकाद्यं च प्राशयोक्तं अनेन न विश्वात्मा भगवान् प्रीयतां अथ भोक्तुं मुनिसंघ
श्याकान्नविशिष्टमुपभुञ्ज्यत स्त्रिलोकी तृप्ता मां संमलसलिले विनिमग्नसंघः ११ यतो जलमाय भग
वान्यपि मूलपाणिर्विस्मापितः स शिविजोऽस्मदान्ति जम्मे अन्येऽपि वाह मन्तुनैव कलेवरेण
मोमदं द्रभवेनेमहरासनार्थं १२ तं चैव मे विहृतो भुजदंडयुग्ममंगोऽडीव लतागमहाति व धाय
देवाः सेंद्राश्रितायदनुभावितमाजमीढतेनाहमद्य मुषितः
प्राहद्युयेति सतावनातितृप्तो दूर्वासा \
केभयेनपलायितद्वति ११ शिशिजासहितो विस्मापितः सन्निजेपाशुपतमस्त्रं अन्ये च लोकपाला
निजान्यस्त्राणि युद्धः अन्यदप्याश्चर्यमाह अमुनैवेति महद्रिदंड्यासनार्हं" नैव स्वर्गं क्रीडतो गाण्डीव
लतणं विद्धस्य तत्र अपातयो निवातकवचा दैत्याः सेषा वृथार्थमाश्रितं वतो येन यदनुभावितं मभाव
मुक्तं हन्त हेयान्नमीढ युधिष्ठिर तेन मुषितोऽवचितोऽस्मि कथंभूतेन भूम्नारूढ निजमहिमा वस्थानेन

पद्मांथ्यर्दर्शयन्नाहिस्मोकं तयस्यापिते नमुषितेहमितिशंवं गौत्संवंधः श्रीकृष्णसंवोधयक पवाहे कौरवसेन्याब्धिं
नाम्नातोगाभीयेणापारचेदेशातोयस्य नत्तरैनीर्णवात् उत्तरगोग्रेद्मप्रतीर्यानिडुस्तराणिमन्वानितिमिंगिला
दीनिभीष्मादिरूपाणियस्मिनपैनीतेगोधनेप्रत्याहृतेच परेषांवीरेभ्यः सकाशात्तेनास्यदृश्मभावास्य
रमलीछत्रपं मणिमयंमुकुंसत्नपंचवस्त्रंयते तान्नमोहनास्त्रेणामोहयित्वाहृते १४ ग्रहग्राम्ननस्ता
येनाज्यन्यवयोलिपिंयेमेडलेमंडितानांभीष्मादीनांचमूषुसारथिरूपेणममाग्रेचरः सन् हेविभोतेभंरय
यद्वा यद्वः कुरुवलाब्धिमनन्तपारमेकोरथेन ततरेहमतीर्यसत्वं प्रत्याहृतं बहुधनं च मया परेषां
तेजास्पदं मणिमयं च हृतं शिरोभ्यः १४ यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमंडल
मंडितासु अग्रेचरो मम विभो रथयूथपानामायुर्मनांसि च दृशा सह ओज आर्छत् १५ यद्दोःषु मा
प्रणिहितं गुरुभीष्मकर्णद्रौणित्रिगर्तशल्यसैंधवबाह्लिकाद्यैः अस्त्राण्यमोघमहिमानि निरूपितानि
ग्रथपानामायुरादीनि योरुशारदृष्ट्यैवाछिन्न प्राहृतवान्नमतो \ निनोपसस्पृशुर्नृहरिदासमिवासुराणि १६
सि उत्साहशक्तिं महोवलं उजः शास्त्रादिकौशलः १५ यद्दोःषु भुजेषु मां प्रणिहितं स्थापितं तेनैव गु
वोरिविनिरूपितानि प्रयुक्तानि अस्त्राणि न स्पृशन्ति स्म गुरुर्द्रोणः त्रिगर्तः त्रिगर्तदेशाधिपतिः सुशर्मा शा
ल्यः सैंधवः सिंधुदेशाधिपतिः जयद्रथः बाह्लीकः शांतनोर्भ्राता अमोघोमहिमा येषां तथाभूतान्यपि पा
दांतनैपि सपवर्ष्यैः प्रतीकाराकरणाययमोर्पशोनाः नृहरिदासमप्रह्लादमिव इति १६ ॥ ॥०

गी॰गो॰
टी॰
७१
71

व्यापारायमनुस्मरन्तृनत्प्रमानस्यार सौन्येसारथे कुमतिनामेमयासंवृतः कुमतिन्वमाह ययात्मदर्शनादि
ना सुभवायमोलायभव्यान्विशः प्रातावाद्यम्रमायस्यनेमानयद्दश्ववधेदिजलपानेविनाः स्याः प्यानाम
नोरथाद्वनोसि वारोभिर्भूत्वभिल्वाजलतेसपारितमया नदायस्यानुभावेननिरस्तचिना सुस्येमानसाद
रनप्रदारकूतेवतः समैसान्यवृतदतिकुमतिल्व १० देनदेव उदारंगंभीरकुचिरेमतस्मिन नेनशोभि
नानिनर्मालिपरिदामवाक्याणिनानि नयाकार्यप्रलापेषु देपार्थेन्पादीनिमधुराणितमाणिसजल्पि।
सौन्येवृतः कुमतिनाम्नदहस्वरोमेयत्यारप्यमभवायभजेतिभव्याः मांश्रान्तवाहमस्योरथि
नोभुविहृनप्राहरान्यदनुभावनिरस्तवितःः १० नर्माण्युदारकुचिरास्मितशोभितानि देपार्थेदे।
नेनमसेविकुकनेदनेति सन्तस्थितानिनरदेवहरिस्थितानि मनेनेलेठति हृदयममभाधवस्य
श्याम्रसनादनविकस्यनभोजनादिधिवेकाद्यस्य सनवानितिविप्रलब्धः सात्वुःसविवपितुव ४
नानिहरिस्मृतानि मनोतानि माधवस्यपान्येतानि नेनयस्यसवेसेदेसहान्मदितयाकुमेनरद्ये।
द्दोनीसन्तेमनहृदयपल्लवेठति लोड्यतितोभयतिताभाववर्धाषः १२ विकल्यनेसगुणाश्चाद्यनादिरुष्या
दिविवेक्यादन्यनिरकाहेतोः कदाचिद्यभिचारदृष्ट्वा देवयस्यसनवान्सन्यघुक्तमस्त्व इतिवक्रोक्तपावि
प्रलब्धः निरस्कृतोपि अभवानितिपाठे अभवोदेवाः सेवकाः संतियस्यासौ महानपि मयायस्यइति ५२
मत्वाविप्रलब्धः निरस्कृतस्यार्थः अभवानितिपाठेवलभावव्यार्थः मेम्रहमयेराथममस्तनमहिनयात्समद

त्वयायुधिष्ठिरेणशंकितंपराभवंचयामोहमित्याह तेनसख्याहितोतोहृदयेनशून्यः अगाद्देशानन
उरुक्रमस्यपरिग्रहंषोडशसहस्रस्त्रीलतांअसद्भिर्नीचैरबलाघोषवज्जितोस्मि २० श्रीकृष्णवियोगएवात्र
हेतुर्नान्यदित्याह तदिति यतोयेभ्यः ईशोनरिक्तंशून्यंयस्मात्कार्यात्तेममत् मंत्रवियोगेनरूपिभस्मनिहुतमि
व अनिशीलादप्यिकुहकानमायाविनः सकाशात्संबद्धं लब्धं कपदादितिपाठः अयमेवार्थः यथासम्य

गोहंनृपेंद्ररहितः पुरुषोत्तमेनसख्याप्रियेणसुहृदाहृदयेनशून्यः अध्वन्युरुक्रमपरिग्रहमंग
रक्षन्गोपैरसद्भिरबलेवविनिर्जितोस्मि २० तद्वैधनुस्तइषवःसरथोहयास्तेसोहंरथीनृपत
योयतआनमंति सर्वंक्षणेनतदभूदसदीशरिक्तंभस्मन्हुतंकुहकराद्धमिवोप्तमूष्याम् २१ रा
जंस्त्वयानुपृष्टानांसुहृदांनःसुहृत्पुरे विप्रशापविमूढानांनिघ्नतांमुष्टिभिर्मिथः २२ वारुणीं
मदिरांपीत्वामदोन्मथितचेतसाम् अजानतामिवान्योन्यंचतुःपंचावशेषिताः २३ प्रायेणैतद्भ
गवतईश्वरस्यविचेष्टितं मिथोनिघ्नंतिभूतानिभावयंतिचयन्मिथः
कुलकर्षणादिनाउग्रोऽग्र
भ्रमोऽग्रमवीजनमिव २१ सुहृत्पुरेत्वयानुपृष्टानांनःसुहृदांमध्ये चत्वारःपंचवावशेषिताः अत्रहेतुर्विप्र
शापेति २२ वारुणीं मन्त्रमयीं मदिरांपीत्वाअजानतामिवान्योन्यंमरका मुष्टिभिर्निघ्नता २३ अवशे
षिताः इत्यनेनोक्तंहेतुकर्तारमाह प्रायेणेति भावयंति पालयंति २४ ॥

भा॰प्र॰
टी॰
७२
72

जलौकसां मत्स्यादीनां मध्ये महान्तः स्थूलाः अणीयसः सूक्ष्मान्यथा भक्षयन्ति २५ एवं बलिष्ठैर्यदुभिः परस्परं वै
पीयन जरासंधादीन् यदुभिरिति शाल्वादीन्निरस्य भुवो भारभूतान्संहृतवान् अतः परस्परं वक्तुं न शक्तो॥
सीति सूचयन्नाह देशकालोचितार्थयुक्तानि मनःपीडोपशमनकराणि च गोविन्दस्य वचनानि स्म
रतो मम चित्तं हरन्ति आकर्षयन्ति २७ एवमिति सूतोक्तिः अतिशयेन स्नेहेन चिन्तयतो मतिः शान्ता।

जलौकसां जले यद्वन्महान्तो दन्त्यणीयसः दुर्बलान्बलिनो राजन्महान्तो बलिनो मिथः २५ एवं
बलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः यदून्यदुभिरन्योन्यं भूभारान्संजहार ह २६ देशकालार्थयुक्ता
नि हृत्तापोपशमानि च हरन्ति स्मरतः चित्तं गोविन्दाभिहितानि मे २७ सूत उवाच एवं चिन्तय
तो जिष्णोः कृष्णपादसरोरुहं सौहार्देनातिगाढेन शान्तासीद्विमला मतिः २८ वासुदेवाङ्घ्र्य
नुध्यानपरिबृंहितरंहसा भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः २९ गीतं भगवता ज्ञानं
विशोका विमला विरक्ता \ यत्तत्संग्राममूर्द्धनि कालकर्मतमोरुद्धं पुनरध्यगमद्विभुः ३०
चासीत् २८ मतिर्वैमल्ये फलमाह वासुदेवाङ्घ्र्यनुध्यानेन परिबृंहितं रंहो वेगो यस्यास्तया निर्मथि
ता उन्मीलिता अशेषाः कषायाः कामादयो मला यस्याः सा धिषणा बुद्धिर्यस्य सः ज्ञानं पुनरध्यगम
दित्यन्वयः २९ कालेन कर्मणा तमसा भोगाभिनिवेशेन च रुद्धमावृतं सत् ३० ॥ ॥

होऽ३

72A

ज्ञानफलमाह अतो लिंगनाशः स्थूलदेहनाशः विशोकइति एतदेव च शोकहेत्वभावेनोपपादय-
ति शोकस्य हि हेतुः द्वैतभ्रमः तस्य हेतुर्लिंगं तस्य गुणाः तेषामविद्या ततश्च ब्रह्मसंपत्त्या ब्रह्माहमि-
ति ज्ञानेन लीना प्रकृतिरविद्या यस्मिंस्तस्मिन्नैर्गुण्यं भवति न तु सुषुप्तिप्रलययोरिवाविद्यादोषवशात्तु नै-
र्गुण्याद्गुणकार्यलिंगनाशः अलिंगत्वाच्चासंभवः सम्यग्भोगाय च भवति पुनःपुनरिति संभवः
स्थूलशरीरं तद्धेतुः ततश्च तस्य तत्परिच्छेदाभावात् संछिन्नो द्वैतलक्षणः संशयो भ्रमः यस्य सः विशोक।

विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः लीनप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः ३१ निशम्य भ-
गवन्मार्गं संस्थां यदुकुलस्य च स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः ३२ पृथाप्यनुश्रुत्य ध-
नञ्जयोदितं नाशं यदूनां भगवद्गतिं च तां एकान्तभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम सं-
सृतेः ३३ ययाहरद्भुवो भारं तां तनुं विजहावजः कंटकं कंटकेनेव द्वयं चापीशितुः समं ३४

जातमिति ३१ भगवतो मार्गमालक्ष्य यदुकुलस्य च संस्थां निशम्य श्रुत्वा नारदोक्तं चानुस्मृत्य स्वःपथाय स्व-
र्गमार्गाय निभृतात्मा निश्चलचित्तो मतिं चक्रे ३२ तोऽड्रविं द्वेयां वसति हि सोदामिन्याय यथा कार्येयात्वा
हित्वाभ्यसेऽडल गतिर्न लक्षिते न मर्त्यैर्लक्ष्याकृतसाध्यदेवैरिति सहसैकपाराम जीवन्मुक्ताव भूव देहजा।
दोहलिवा ३३ तदेतदुक्तमपिपारवैभ्यं भगवतो वैलक्षण्यं तुह्यातत्सामस्य वहतो मदमतीत्यतिवेलक्षण्य

पीकृतमर्त्यैर्विशेषमाह यथेति नान्यपि यथाधत्ते जहाति च नटाद् यथा नटो निजरूपेणावस्थितः स
न्नरूपान्तराणि धत्ते एवमनन्वर्तते तथा नटोपि कलेवरं जहौ न नरवदित्यर्थः ३५ युधिष्ठिरस्य स्वर्गारोह
णप्रसंगात्कलिप्रवेशमाह सतन्वाजहौ स्वतनोरेव वैकुंठमारोहन् श्रवणीया सती कथा यस्य सः
तदा यदहस्तस्मिन्नेवाहनीति लक्षमसमस्यातं पदं अप्रतिबुद्धचेतसामविवेकिनां तत्र प्रभुरित्युक्तं अत्र

यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः भूभारः क्षपितो येन जहौ तच्च कलेवरं ३५ यदामु
कुंदो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथाः तदाहरेवाप्रतिबुद्धचेतसामभद्रहेतुः
कलिरन्ववर्तत ३६ युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तदात्मनि विभाव्य लो
भानृतजिह्म[illegible]हिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ३७ स्वराट्पौत्रं विनयिनमात्मनो सुसमं
गुणैः तोयनीव्याः पतिं भूमेरभिषिंचद्गजाह्वये ३८ मथुरायां तथा वज्रं शूरसेनपतिं ततः
प्राजापत्यां निरूप्येष्टिं

वर्ततेति पूर्वमेवांशेन प्रविष्टस्तेनैव रूपेणानुवृत्तिः कृता ३६ बुद्धे युधिष्ठि
रः तस्य कलेः परिसर्पणं प्रसरणं विलोक्य कथंभूतं लोभाद्यधर्मचक्रं यस्मिन् जिह्मं कौटिल्यं पर्यधात्
तदुचितं परिधानमकरोत् ३७ आत्मनः स्वस्य गुणैः सुसमं अतिसदृशं तोयसवेतःस्थितं समुद्रोदकमेव
नीवी च परिधानविशेषो यस्याः तस्याः भूमेः पतित्वेनाभिषिक्तवान् ३८ वज्रमनिरुद्धस्य पुत्रं निरूप्य

अग्नीनपिबदीश्वरः ३९

कृत्वेत्यर्थः अपिबदात्मन्यारोपयामास यत ईश्वरः समर्थः ३९

गी॰तत्त्वदीपिका ३

73A

संछिन्नाशेषाशिवंधनानि उपादयोपेन ५॰ नेदेवदर्शयति द्वाभ्यां वाचमितुपलक्षणं सर्वेंद्रियाणामन
सिप्रविलापितवानित्यर्थः नञ्चमनःप्राणोप्राणार्थी नवृत्तिन्वान तम्प्राणमिति रेपानेनेनाकर्षणात् अपान
व्यापारउत्सेहितमपानमश्नौतदर्शिशत् देवतायां अनेनैवचवागादिक्षपितवतंतत्कर्म साहित्यतेयं नेच
मत्स्युपचलेपचभूतानामेकेदेहे देहस्यैवमत्स्युर्नात्मनइतिभावितवानित्यर्थः अत्तोहवीदितियत् त्व

विसृज्यतचतत्सर्वंउकूलवलयादिकं निर्ममोनिरहंकारः संछिन्नाशेषबंधनः ४॰ वांचन्तुहाव
मनसितत्प्राणारतेरचते मृत्याचपानेसोत्सर्गतंपचलेयञ्जोहवीत ४१ त्रित्वेकृत्वाचपचत्वत
वैकल्येजहेत्सुनिः सर्वमात्मन्यजुहवीत्कृत्स्नाणात्मानमव्यये ४२ चीरवासानिराहारोवद्धवा
अञ्जलमूर्द्धजः दर्शयन्नात्मनोरूपंजडोन्मत्तपिशाचवत् ४३ अनवेत्यमानोनिर्गात्शूण्वव
गताहंहृडिःरूपे ४१ त्रित्वेगुणत्रये नचत्रित्व\ पितोयया उदीचीप्रविवेशाशांयानस्सर्वामहात्मभिः
मेकत्वेप्यविद्यायां सर्वंसर्वोपदेनविद्यामात्मनिजीवे अनोहवीदितिवक्तव्येअजुहवीमदित्यार्षं एवंसं
योचितमात्मानंवद्धमाणव्यायेकूटस्थेननस्यान्यवलयदइत्यर्थः ४२ दीतदेवतामात्मप्रतिपत्तिमुक्त्वावाह्य
स्थितिमाह चीरवासाइतिद्वाभ्यां वृद्धवाक्मोनी ४२ अनवेत्यमानः पृष्ठंतारिपतीक्षामकुर्वन्
यायांदिशं गतवर्वांप्रवेप्रतिशं महात्मभिर्विवेकिभिः ४४ ॥

भा॰ प्र॰
टी॰
७४
74

यतः यांदिशं आस्थायमौ निर्देयम्सतेन ४५ साधुकृताः सर्वैर्यथापर्मादयोयैरतएव वैकुंठस्यचरणांबुज
मेवात्यंतिकशरणंज्ञात्वा ४९ ४८ कथंभूतेपदे विधूतकल्मषाणांस्थानंनिवासस्थाने यत्रस्मिल्लि
गर्भा॰ रजेवात्मनेवप्रापुर्नतुषोडशकलेनलिंगेन गतेर्वा विशेषणं विरजेनात्मनैवावस्थान इत्यंगति
तेविधूतकल्मषाप्रापुरिति तीर्थान्यधीरत्प्रभासे श्रीकृष्णावेशेनश्रीकृष्णेसविनमावेशपदेह्यपरि।

हरिविरह्यपंथ्याय यत्रावगतेनियतोगताः सर्वैतमनुनिर्जग्मुर्भ्रातरः कृतनिश्चयाः ४५ कलि
नाधर्ममित्रेण दृष्ट्वास्पृष्टाः प्रजाभुवि तेसाधुकृतसर्वार्थाज्ञात्वात्यंतिकमात्मनः ४६ मनसा
धारयामासुर्वैकुंठचरणांबुजं तद्ध्यानोद्रिक्तयाभक्त्याविशुद्धधिषणापरे ४७ तस्मिन्नारा
यणपदेएकांतमतयोगतिं अवापुर्दुरवापांतेअसद्भिर्विषयात्मभिः ४८ विधूतकल्मषा
स्थाने विरजेनात्मनैवयत् विदुरोपिपरित्यज्यप्रभासेदेहमात्मवान् कृष्णावेशेनतच्चित्तः
पितृभिः स्वक्षयंययौ ४९ द्रौपदीचतदाज्ञायपतीनामनपेक्षतां वासुदेवेभगवतिह्येकांतम
तिरापतम् ५० ॥

त्यक्त्वा वितएवमत्र तदानींनेत्रमार्गतैः पितृभिः सहस्वक्षयंस्वाधिकारस्थानंययौ ४९ आत्मानं
प्रतिप्रनपेक्षतांतदात्वानमापइति ५० श्रीरामायनमः श्रीगोविन्दायनमः॥

५४

74A

एवंयत्कृष्णप्रयाणममलमतिशयेनस्वल्पयत्नेनमंगलायुःस्पृशेत्सलेभपवित्रंच ५ इतिप्रथमेभावार्थेपंचदशः १५
ततःषोडशेभूमिर्धर्मयोः कलिविजययोः संवादेवर्ण्यतेप्रोमिःपालकस्यपरीक्षितः १ द्विजवर्याणांशि
क्षया सूत्याजन्मनिग्रभिजातकोविदः जातकर्मविदः द्विप्रमहनागुणामयस्मिनसः १ जनमेजया
यः स्वहृदयेनभगवत्प्रियाणांपाण्डोः सुतानामितिसंप्रयाणं शृणोत्यलेस्वल्पयत्नेनपवित्रंलब्धाहैमभ
क्तिंसेपंमसिद्धिं ५ इतिश्रीभागवतेप्रथमस्कंधेपांडवानांसंप्रयाणंनामपंचदशोध्यायः १५ सू
तउवाच ततःपरीक्षिद्विजवर्यशिक्षयामहीमहाभागवतःशशासह सूत्यादिसूत्यामभिजातको।
विदःसमादिशन्विप्रमहद्गुणालया १ सउत्तरस्यतनयामुपयेमेइरावती जनमेजयादींश्चतुर
स्तस्यामुत्पादयत्सुतान् २ आजहाराश्वमेधांस्त्रीन्गंगायांभूरिदक्षिणान् शारद्वतंगुरुंकृत्वादेवा
यत्राक्षिगोचराः ३ निजग्राहौजसावीरः कलिंदिग्विजयेक्वचित नृपलिंगधरंशूद्रंघ्नंतंगोमिथुनंपदा
सं ४ शौनकउ० कस्यहेतोर्निजग्राहकलिंदिग्विजयेनृपः नृदेवचिह्नधृक्शूद्रकोसौगांयःपदाहनत
दीनित्यनुवादिकंस्पष्टं २ आजहारकृतवान् शारद्वतंकृपंगुरुंकृत्वायत्रयेष्वश्वमेधेषुदेवाःदृष्टिगोचरा
बभूवुः ३ निजग्राहगृहीतवान् कलिमेवनिर्दिशति नृपेति ४ कस्यहेतोरिति प्रश्नार्थः कलिंकस्मा
द्धेतोकेवलंनिजग्राहननतुहतवान् यतोसौशूद्रकः अतिकुत्सितः अतः गांपदाहनदिति ५ ॥ ॥

